11356

आर्यविद्यासुधाकरः

ARYAVIDYA SUDHĀKARA

OR A

Compendium of Hindu Culture and Philosophy

BY

YAJÑEŚVARA CIMAṆA BHAṬṬA

EDITED WITH NOTES ETC.,

BY

Mahāmahopādhyāya

PANDITA ŚIVADATTA D. KUDĀLA,

Late Head Pandit and Superintendent, Oriental College,
Lahore, Fellow of the Punjab University,
Sanskrit Scholar of Jayapura
Sanskrit Pâthaśâlâ

New Edition, Revised with Notes,

BY

DR. MANGAL DEVA SHASTRI.

M. A., D. Phil. (Oxon.),

Principal, Government Sanskrit College, Benares

PUBLISHED BY

Moti Lal Banarsi Dass

ORIENTAL BOOKSELLERS & PUBLISHERS,

SAID MITHA, LAHORE

1940

PUBLISHED BY

Sundar Lal Jain

Managing Proprietors

M/s MOTI LAL BANARSI DASS

SAID MITHA, LAHOR.

(All Rights Reserved by the Publishers)

Printed only 500 Copies.

1940

PRINTED BY

B. K. Shastri

JYOTISH PRAKASH PRESS

BISHWESHWARGANJ

BENARES 2436

आर्यविद्यासुधाकरः

प्राचीनार्वाचीनार्यजनसंपादितानां विविधविद्या-
नीतिधर्मादिविचाराणां
विज्ञानस्य प्रकाशकः
सुरतपत्तन निवासिना महाराष्ट्राभिजनेन
चिमणभट्टसूनुना भट्टयज्ञेश्वरशर्मणा विरचितः

स
चायं
महामहोपाध्याय श्री पं० शिवदत्तकृत टिप्पणीभिः
नूतनटिप्पणीभिश्च

काशिकराजकीय संस्कृत महाविद्यालयस्याध्यक्ष-
पदमधितिष्ठता
डाक्टर श्रीमङ्गलदेव शास्त्री,
एम० ए०, डी० फ़िल० (आक्सफ़ोर्ड) इत्येतेन
सपरिश्रमं संशोध्य
सम्पादितः ।

खिस्ताब्दाः १९४०

❀ किञ्चित्प्रास्ताविकम् ❀

भारतीयार्यजनानां संस्कृतेः साहित्यस्य चैकत्रैव समष्टिरूपेण वर्णनपरस्यास्य ग्रन्थरत्नस्यातीवोपयोगित्वं कस्य खलु विपश्चितस्तिरोहितं भवेत्। प्रथमवारं १८६८ मिते खिस्ताब्दे प्रकाशितोऽसौ ग्रन्थो द्वितीयवारं महामहोपाध्यायश्रीपण्डितशिवदत्तमहोदयैर्नानाटिप्पणीभिः १९२३ मिते खिस्ताब्दे संपादित आसीत्। ततः किञ्चित्कालानन्तरमेव दुष्प्राप्यतामस्योपलभ्य प्रायेण १९३१ तमेऽब्दे तस्यैव पुनःप्रकाशनार्थं समुद्यतः प्रकाशकमहोदयोऽस्मास्वेव साग्रहं पुनःसंशोधनभारं न्यस्तवान्। सम्पादनकार्ये कतिचिद्वर्षेभ्यः प्रागेव समाप्तप्रायेऽपि यदस्य मुद्रणेन चिरायितं तत्र खल्वस्माकं कार्यातिभारेणानवकाश एव प्रथमतो मूलम्।

अस्य संशोधने सम्पादने च यादृशं काठिन्यमासीत्, यादृशं चास्य संस्करणस्य पूर्वसंस्करणापेक्षया वैशिष्ट्यमिति न तदस्माकं वक्तव्यमपेक्षते। पूर्वप्रकाशितसंस्करणद्वयमपि समीक्षापुरस्सरं पश्यतां नैतत्तिरोहितं भवेत्। नैकग्रन्थेभ्यस्तत्र तत्र समुद्धृतानां वचनानां स्थलनिर्देशैरुपयुक्ताभिर्नूतनटिप्पणीभिरेवास्य संस्करणस्य वैशिष्ट्यं स्पष्टीभविष्यति सर्वेषाम्। तत्र तत्र ५, ६ इत्यादिपृष्ठेषु कोष्ठगतैः प्रश्नचिह्नादिभिः संकेतिता मूलपुस्तकीयभाषाया अशुद्धयोऽपि अस्यापरं वैशिष्ट्यमावहन्ति। किंकृतास्ता अशुद्धय इति तु कथनं दुःशकम्।

कृतेऽपि परिश्रमे नैककारणतो विशेषतश्च मुद्रणदोषादनेका अशुद्धयोऽवशिष्टाः। प्रायेण सर्वा अपि ताः शुद्धिपत्रे संशोधिताः। सत्यप्येवं याः काश्चिच्त्रुटयोऽवशिष्टाः स्युस्तदर्थमाशास्यते यदुदाराः पाठका अस्मान् क्षमिष्यन्ते।

विदुषां वशंवदः

१५।९।१९४०

मङ्गलदेवशास्त्री

❀ श्रीः ❀

(टिप्पणीकर्तृकर्तृका)

❀ प्रस्तावना ❀

याभ्यामियं भारती भूर्भूता राजन्वती किल ।
तौ जार्जमेयौ सम्राजौ प्रजाः पालयतां चिरम् ॥ १ ॥

आर्यविद्यासुधाकरोऽयमार्यसाहित्यसागरमन्थनजन्मा सुधाकर इति ग्रन्थकारोक्तिः सर्वथाऽवितथा । यतोऽनेनोदितेन अद्यतनजनमनोगगनमावृण्वानमार्यविद्याविज्ञानवैधुर्यजं विविधसंशयकुतर्कसन्तमसं समपहर्तुं ज्ञानज्योत्स्ना प्रसारिता ।

यथा कश्चित् स्वगृहान्तर्निहितान् पूर्वपुरुषोपार्जितान् रत्नप्रदीपानपरिज्ञाय परान् भिक्षितैर्मृद्दीपैरुल्मुकनिकरैश्चावाससन्ततं तमोऽपसारयितुमुद्युङ्क्ते, तथाऽद्यतना आर्याः परसब्जाब्द (?) (१३७२९४५०२४ वर्तमानकल्पकाल) पूर्वप्रादुर्भूतऋषिवर्यैः सञ्चितं ज्ञानराशिमपरिचिन्वानाः पाश्चात्यैरार्यगौरवापकर्षाय कपोलकल्पितान् आर्यवञ्चनाप्रबन्धानुपजीव्य निजधर्मनिर्णयं तत्सम्बन्धिशङ्कानिरासं च कर्तुं प्रयतन्ते । तेषां कुकल्पनाभिर्व्यामोहिताश्च तन्मयतामेत्य —

"दन्द्रम्यमाणाः परियन्ति मूढा अन्धेनैव नीयमाना यथान्धाः" ।

इति न्यायलक्ष्यतां प्राप्ताः स्वपूर्वजान् साक्षात्कृतधर्मणो महर्षीन् अवाच्यवादैर्योजयन्ति, येषां विज्ञानवैभवं पाश्चात्या अपि शतमुखैः प्रशंसन्ति । हन्त नितान्तं लज्जाकरमिदं महर्षिसन्ततीनाम् ।

इदमेवानुभवता योग्येन ग्रन्थकृताऽङ्गीकृतः परिश्रमो ग्रन्थस्यास्य निर्माणे । उपकृतं च महत् कृतिनोऽनया कृत्याऽऽर्यसाहित्यपरिशीलनरसिकानां विदुषामपीति धन्यवादार्होऽसौ महानुभावः ।

यथामति ग्रन्थकृता साधु विशदीकृता अत्र ते ते विषयाः, विशयाश्च तद्गताः सम्यङ् निरस्ताः। मयापि ग्रन्थमिमं मुद्रणाय सज्जीकुर्वता निजाभिमतं तत्र २ टिप्पणीभिर्दर्शितम् ।

किञ्च अर्जुनेन नागकन्यायां नियोगः कलियुगे कृतः—इति यदत्र प्रतिपादितम्, तन्न नो रुच्यास्पदम् । यतो महाभारतयुद्धं कलियुगारम्भात् पूर्वमेव संवृत्तमासीत् । नियोगश्च ततोऽपि पूर्वं (द्वापरापरसंधौ) संवृत्त इति न तस्य ३६००० कलिप्रथमसन्धिसमाप्त्युत्तरं वर्तिष्यमाण ३६०००० वर्षमानकलियुगभवत्वं विभावनीयम् ।

ग्रन्थरत्नमिदमार्यसाहित्यसमालोचनरसिकाः सहृदया विद्वांसोऽक्षरयोजकप्रमादेन सञ्जाताशुद्धिकालुष्यमपि सकज्जलकालुष्यं मृगाक्षीणामक्षीव नियतं सत्करिष्यन्तीत्याशास्ते—

महामहोपाध्यायपण्डित—
शिवदत्तशर्म्मा
दाधिमथः ।

(ग्रन्थकर्तृकर्तृका)

❀ प्रस्तावना ❀

पुरा किलात्र भारते वर्षे वेदशास्त्रादिसकलसंस्कृतविद्यापारावारपारीणा धरणीगीर्वाणा विद्वांसो भूयांसः सम्बभूवुः । ते च सर्वे प्रायशो दक्षिणानपेक्षा एव विनयसौजन्यादि-गुणोपेतान् ग्रहणधारणापटून् शिष्यबटून् सम्यगध्याप्य दीपाः प्रतिदीपानिव स्वसमानां-स्तान्निर्वर्त्तयाञ्चक्रिरे । किञ्च तानेतान् विद्वज्जनान् यथोचितदानमानसत्कारैः स्वयशः-सुधाकरचन्द्रिकाधवलिताखिलवसुन्धराधराधिपतयः परेऽपि श्रीमन्तः सद्गृहस्थाः प्रीणया-ञ्चक्रुः । तथा चैवं शिष्यप्रणालिकया सन्ततमनुवर्त्तमान एव विविधगीर्वाणविद्याप्रकाशो भूतलमुद्योतयन्नास्ते । अथ कालवशादापतितेन वेदादिविद्यापठनपाठनसम्प्रदायस्याति-कृशत्वेन सलिलसेकादिसहकारिकारणविरहेणोद्यानभूमय इव गीर्वाणविद्या जीर्णतामाव-हन्ति । नचैतावता अर्वाचीनाः कुमारा अकृतबुद्धयः सन्तीति विवक्षितम् । यतो निजस-द्गुणगणानुरञ्जितनिखिलभूमण्डलया निजप्रजाहितनिरतया हूणसाम्राज्यसिंहासनपदाधि-ष्ठितया श्रीमत्या विक्टोर्याख्यमहाराज्ञ्या स्वराष्ट्रे सर्वत्र ग्रामनगरादौ सुप्रतिष्ठापितासु पाठ-शालासु सम्प्रति सम्पादिताऽभिनवविविधविद्याशिल्पादिविज्ञाना नव्यतरास्तरुणपुरुषाः पुराणपण्डितबुद्धिवैभवमतिवर्त्तन्ते । परन्तु लोकहितानुबन्धिविचारशीलैर्नव्यजनैरार्यकुलो-चितानां सांसारिकव्यवहारविचाराणां सनातनधर्म्माणां च विज्ञानमवश्यं सम्पादनीयम् । अन्यथा यथावस्थितं सारासारवस्तुविवेचनं न स्यात् । प्रकृतं च विज्ञानं पुरातनबुधजनै-र्मनोवाक्कायकर्म्मभिर्लोककल्याणाय कृतभूरिपरिश्रमैर्विरचितानां विद्याधर्म्मन्यायनीत्यादि-विषयप्रतिपादकग्रन्थानां व्युत्पत्तिसापेक्षमेव । ते च ग्रन्था एकैकविषयसमर्थनायानेकेऽति-विस्तृताः सर्वेऽपि गीर्वाणभाषयोपनिबद्धाश्च सन्ति । यद्यपि संस्कृतविद्यासिद्धान्तास्तत्त-द्ग्रन्थाध्ययनमननादिभिर्यथास्थिता अवगन्तुं शक्यास्तथापि नानाविधापूर्वविद्याशिल्पाद्य-न्वेषणे प्रयतमानैर्नव्यजनैस्तत्कार्यपर्याप्तशास्त्रव्युत्पत्तिसमयावसरादिसामग्रीविरहान्न ते यथा-र्थमवगन्तुं शक्यन्ते । तस्मात् प्रस्तुतविषयाणां संक्षेपतः सिद्धान्तप्रकाशनं यद्येकेनैव नातिविस्तृतेन ग्रन्थेन भवेत् तर्हि तत्तद्विषयजिज्ञासूनां सर्वेषां स ग्रन्थोऽतीवोपकारकः स्यादित्येवमर्थमार्यविद्यासुधाकरनामकोयं ग्रन्थः प्रारभ्यते ।

प्रस्तुतग्रन्थरचनोपयुक्ताः कतिचिद्वार्त्ता हूणभाषाविचक्षणेन संस्कृतविद्याविशारदेन जवेरीलालोमाशङ्करनामधेयमित्रवर्येण मह्यमावेदिताः, पुस्तकमुद्रणायामपि तेन सहायतया व्याप्तमिति महान्तमहं तत्कृतमुपकारभारं धारयामि । तथा खाण्डिलकरोपाह्वयैरापदेव-शास्त्रिभिरपि मुद्रणीपत्रशोधनपरिश्रमं स्वीकृतवद्भिर्मयि बहूपकृतम् ।

य० चि०

संस्करणेऽस्मिन् प्रमाणत्वेनोद्धृतत्तद्ग्रन्थबोधनार्थं प्रयुक्तानां संक्षिप्तचिह्नानां विवरणम्

अष्टा० = पाणिनीयाष्टाध्यायी

आप० श्रौ० = आपस्तम्बश्रौतसूत्रम्

आश्व० गृ० = आश्वलायनगृह्यसूत्रम्

आश्व० श्रौ० = आश्वलायनश्रौतसूत्रम्

ऋ० = ऋग्वेदसंहिता

ऋ० खि० = ऋग्वेदसंहिताखिलानि

ऋ० सर्वानु० = ऋक्सर्वानुक्रमणी

ऐ० ब्रा० = ऐतरेयब्राह्मणम्

क० उ० (कठोप० इतिवा) = कठोपनिषद्

का० उ० = कालाग्निरुद्रोपनिषद्

का० श्रौ० = कात्यायनश्रौतसूत्रम्

गौ० ध० = गौतमधर्मसूत्रम्

च० = चरणव्यूहः (शौनकीयः)

छा० उ० = छान्दोग्योपनिषद्

जा० उ० = जाबालोपनिषद्

तै० आ० = तैत्तिरीयारण्यकम्

तै० उ० = तैत्तिरीयोपनिषद्

तै० सं० = तैत्तिरीयसंहिता

नि० = निरुक्तम्

नि० परिशि० = निरुक्तपरिशिष्टम्

न्या० सू०=गौतमन्यायसूत्राणि

न्या०सू०वा०भा०=न्यायसूत्रवात्स्यायन-भाष्यम्

प्र० सू० = प्रतिज्ञासूत्र परिशिष्टम्

बृ० उ० (बृह० उ० इति वा) = बृहदारण्यकोपनिषद्

बृ० दे०=बृहद्देवता('मैक्डानेल' द्वारा संपादिता)

भ० गी० = भगवद्गीता

भाषा०=भाषापरिच्छेदः

मनु०=मनुस्मृतिः

महाना० उ०=महानारायणोपनिषद्

महा० पस्पशाह्नि० = महाभाष्यपस्पशाह्निकम्

मु० उ० = मुण्डकोपनिषद्

या० स्मृ० = याज्ञवल्क्यस्मृतिः

यो० भा० = योगसूत्रव्यासभाष्यम्

रघु० = रघुवंशकाव्यम्

वा० = कात्यायनीयवार्त्तिकानि

वाक्यप० का० २ = वाक्यपदीयस्य द्वितीयकाण्डम्

वा० रा० अयो० का० = वाल्मीकिरामायणस्य अयोध्याकाण्डम्

वा० सं०=वाजसनेयिमाध्यन्दिनसंहिता

वे० सू० = वेदान्तसूत्रम्

वे० सू० शां० भा० = वेदान्तसूत्रशाङ्करभाष्यम्

श० ब्रा० = शतपथब्राह्मणम्

श्वे० उ० = श्वेताश्वतरोपनिषद्

सां० का० = सांख्यकारिका

❀ अत्र ग्रन्थे प्रतिपाद्यविषयाणामनुक्रमणिका ❀

❀ प्रथमः प्रकाशः ❀

मङ्गलाचरणम् १
उपोद्घातः १
आर्यसंमतसृष्टिविचारः २
आर्यजनानामुत्पत्तिस्थानविचारः ४
ब्राह्मणादिजातिविवेकः ८
चीनयवनादीनामुत्पत्तिकथनम् ९
आर्याणामुत्पत्तिकालविचारः १०
पुरातनानामार्यजनानां विद्याशिल्पादिविज्ञाननिरूपणम् ११
प्रसङ्गात् वर्णलिपिसमुद्भवविचारः १६
गणितविद्योत्पत्तिविचारः २१
व्याकरणविद्योत्पत्तिविचारः २३
स्वर्गादिसाधनानि २४
उद्योगवादः २५
आर्यधर्म्मविचारः २६
वेदशब्दार्थः २६
वेदभेदाः २७
ऋग्वेदमानं तच्छाखाश्च २८
शाखाभेदकारणम् २९
ऋग्वेदस्य सूक्तादिपदव्यपदेश्यो विभागः २९
सूक्तलक्षणम् २९
मण्डललक्षणम् ३०
दृशानां मण्डलानामृषयः ३१
ऋषीणां लक्षणादिविचारः ३१
कृष्णयजुर्वेदीयशाखानिरूपणम् ३६
यजुर्वेदस्य कृष्णशुक्लभेदे कारणम् ३७
शुक्लयजुःशाखास्तन्मानं च ३८
सामवेदशाखास्तन्मानं च ३८
अथर्वणशाखास्तन्मानं च ३९
वेदाङ्गानां सप्रयोजनं निरूपणम् ३९
वेदस्योपाङ्गानि ४०
स्मृतिकाराः पुराणनामानि च ४०
धर्म्मनिर्णये प्रमाणविचारः ४२
तत्र प्रबलदुर्बलविवेकः ४२
धर्म्मस्य सत्यमूलकत्वम् ४३
सत्यप्रशंसा ४४
धर्म्मस्य द्विविधत्वं प्रवृत्तनिवृत्तभेदेन ४५

❀ द्वितीयः प्रकाशः ❀

श्रौतयज्ञास्तेषां च भेदाः ४९
प्रकृतिविकृत्यादिलक्षणम् ४९
ऋत्विजः ५०
अग्न्याधानम् ५१
यज्ञियकुण्डादिनिरूपणम् ५१
यज्ञपात्राणि वेदोदितानि ५२
अग्निहोत्रम् ५३
दर्शपूर्णमासयागः ५३
यज्ञस्वरूपविचारः ५४
आग्रयणेष्टिः ५५
चातुर्मास्यानि ५६
वैश्वदेवयागो वैदिकेतिहाससहितः ५७
वरुणप्रघासः सेतिहासः ५८

साकमेधः सेतिहासः ५८
शुनासीर्ययागः ६०
सोमयागः सप्रभेदः ६०
यागयोग्यभूमिविचारः ६०
सौमिकवेदिनिरूपणम् ६३
पशूपाकरणं सप्रयोजनम् ६५
सोमपात्राणि ६६
सोमाभिषवप्रकारः ६७
अग्निष्टोमीयदक्षिणाविचारः ६९
राजसूययज्ञः ७१
अश्वमेधयज्ञः ७३

❀ तृतीयः प्रकाशः ❀

स्मार्त्तसंस्काराः ७५
संस्कारप्रयोजनविचारः ७६
गर्भाधानं सप्रयोजनम् ७६
पुंसवनसंस्कारः ७७
सीमन्तोन्नयनम् ७७
जातकर्म्मसंस्कारः ७८
जननाद्याशौचे श्रुतिसंमतिः ७८
नामकरणनिष्क्रमणान्नप्राशन-चौलसंस्काराः ७९
उपनयनसंस्कारः ८०
ब्राह्मणादिबटूनां मौञ्जीमेखलादयः ८०
वेदाभ्यासविचारः ८१
ब्रह्मचारिनियमाः ८४
विवाहनिरूपणम् ८६
सापिण्ड्यनिर्णयः ८६
वधूवरयोर्विवाहयोग्यगुणादि ८९
असवर्णकन्याविवाहप्रकारः ९३
प्रसङ्गात् पुनर्विवाहविचारः ९४
मृतभार्यादेः पुनः परिणयनम् ११०
गृहस्थधर्म्माः ११२
गृहस्थस्य जीविकाः ११३
आपदि सर्वेषां जीवनोपायाः ११५
अथाह्निकविचारः ११६
सन्ध्योपासनम् ११७
देवार्चनविधिः ११८
दानधर्म्मकथनम् ११९
पात्रलक्षणम् १२०
पञ्चमहायज्ञविचारः १२१
अतिथिलक्षणम् १२३
आतिथ्यविचारः १२४
शूद्रस्य धर्मकर्मणि कियानधिकारः १२५
श्राद्धप्रकरणम् १२८
मृतानां श्राद्धफलप्राप्तिद्वारम् १३१
गृहस्थानां हितोपदेशः १३२
गृहस्थाश्रमस्थस्यैव संन्यासप्रकारः १३३
अथ वानप्रस्थाश्रमः १३३
अथ संन्यासाश्रमः १३४
वर्णक्रमेणैकद्याद्याश्रमविचारः १३४
सर्वाश्रमिणां साधारणधर्म्माः १३६

❀ चतुर्थः प्रकाशः ❀

अथ पौराणमतस्वरूपम् १३७
सामान्यरूपेण तान्त्रिकमतम् १३९
तन्त्रभेदास्तेषां लक्षणानि च १३९
तान्त्रिकानुष्ठाने कस्य कियानधिकारः १३९
चतुःषष्टिकौलतन्त्राणां नामानि १४०
तत्र तत्र तन्त्रेषु प्रतिपाद्या विषयाः १४०
अथ दर्शनमतविचारः १४२
नास्तिकास्तिकयोर्लक्षणम् १४२
चार्वाकमतसङ्ग्रहः १४२
बौद्धमतदर्शनानि १४४
बौद्धान्तर्गतस्य माध्यमिकस्य मतम् १४४
योगाचारमतम् १४७

सौत्रान्तिकमतम् १४८
वैभाषिकमतम् १४९
जैनमतम् १५१
चार्वाकादीनामुत्पत्तिकालविचारः १५६
अथास्तिकदर्शनानि १५९
न्यायशास्त्रमतदर्शनम् १५९
सांख्यशास्त्रमतम् १६७
सेश्वरसांख्यभूतयोगशास्त्रमतम् १७२
धर्म्ममीमांसाशास्त्रमतम् १७४
ब्रह्ममीमांसाशास्त्रमतम् १७९
शङ्कराचार्योत्पत्तिकालकथनम् १९१
वैष्णवलक्षणम् १९३
विष्णुस्वामिमतप्रदर्शनम् १९३
विष्णुस्वामिन इतिहासः १९३
रामानुजाचार्यमतप्रदर्शनम् १९४
तस्येतिहासश्च १९६
मध्वाचार्यमतप्रदर्शनम् १९६
मध्वाचार्यस्येतिहासः १९९
वल्लभाचार्यमतं सेतिहासम् २००
अथ माहेश्वरमतानि २०१
अथ पाशुपतानां मतम् २०१
शैवमतदर्शनम् २०४
प्रत्यभिज्ञामतदर्शनम् २०६
रसेश्वरमतदर्शनम् २०७
स्वामिनारायणोत्पत्तिकालः २०८

❀ पञ्चमः प्रकाशः ❀

पूर्वोक्तार्थस्य सारांशः २०९
धर्म्मसंप्रदायाभासप्रचारे कारण-
विचारः २०९
युगधर्म्मनिरूपणम् २१०
पुराणानां परस्परविरोधस्य
परिहारः २१०
नानादेवतावादतात्पर्यविचारः २११
सर्वदर्शनानामैकमत्यप्रदर्शनम् २१४
सारार्थनिष्कर्षः २१५
ग्रन्थोपसंहारश्लोकाः २१७

समाप्तिः



श्रीगणेशाय नमः ।

भट्टयज्ञेश्वरकृत

आर्यविद्यासुधाकरः ।

अथ प्रथमः प्रकाशः

सतां साध्यानि सिध्यन्ति यत्प्रसादान्महान्त्यपि ॥
तं विघ्नदावदहनं देवं वन्दे गजाननम् ॥ १ ॥
नमस्तस्मै महेशाय निर्म्मलज्ञानमूर्त्तये ॥
अचिन्त्यचित्ररचनं यत्सङ्कल्पभवं जगत् ॥ २ ॥
जयन्ति रामभद्रस्य पावनाः पादपांसवः ॥
लेभे शिलापि यैः स्पृष्ट्वा वाचं वाकपतिदुर्वचाम् ॥ ३ ॥
वासिष्ठवामदेवादीन् महर्षीन् मन्त्रदर्शिनः ॥
विश्ववन्द्यान् नमस्यामि विभूतीः परमेशितुः ॥ ४ ॥
जयन्ति मनुहारीतयाज्ञवल्क्यादयो बुधाः ॥
प्रकाशितश्चतुर्वर्गो येषां वाक्यार्करश्मिभिः ॥ ५ ॥
कालमहार्णवमग्ना अपि भावा यैः स्वबुद्धितूलिकया[2] ॥
आलिखिता वाक्फलके जयन्ति ते क्रान्तदर्शिनः कवयः ॥६॥
महाशंकरशर्माणं गुरुं नत्वा विदां वरम् ॥
यज्ञेश्वरेण क्रियते आर्यविद्यासुधाकरः ॥ ७ ॥
प्राचां कवीनां वाक्पङ्क्तिर्भूयान्मेऽमुं चिकीर्षतः ॥
सन्दर्भं दृढ आधारो नौकेवार्ण्धिं तितीर्षतः ॥ ८ ॥
ग्रन्थेऽस्मिन्नार्यलोकानां व्यवहारप्रदर्शकाः ॥
विद्याशिल्पादयो भावाः प्रकाश्यन्ते यथामति ॥ ९ ॥

अथात्र ग्रन्थे येषां विद्यादयोऽर्थाः[1] प्रकाश्यन्ते तेषामार्यजनानां मूलोत्पत्तिस्थानादिवर्णनरूपाश्चिरन्तन इतिहासस्तावदादौ युज्यते वक्तुम् । येन सुलक्षिता आर्यजना भवेयुरिति चेत् । सत्यम् । परन्तु महर्षीनारभ्य एतत्कालपर्यन्तमनुवर्त्तमानानामार्यजनानाम-विकलवृत्तान्तप्रधानेतिहासरूपं विषयमवलम्ब्य प्रवर्त्तमानो नैको-

---

१ पदार्थाः । २ चित्रलेखनी तूलिकेत्याभिधीयते ।

ऽपि निबन्धः सम्प्रत्युपलभ्यतेऽस्माभिः। यद्यपि श्रुतिस्मृतिपुराणादीनि धर्मशास्त्रानुशासनानि सन्तीतिहासविमिश्राणि तथापि न तेभ्यो यथालक्षित इतिहासो लभ्यते। श्रुत्यादीनां प्राधान्यतो धर्म्मनिरूपणार्थं प्रवृत्तत्वेनेतिहासवर्णनस्य तत्राप्रकृतत्वात्। अप्रकृतोऽप्यर्थः प्रसङ्गेनोपस्थितश्चेन्नोपेक्ष्यते किन्तु मुख्यं विषयमुपोद्बलयितुं यावदादेयस्तावदेवोपादीयते इति ग्रन्थकृतां समयः। तस्मादत्र सनातनस्तत्तत्काले परिवर्तमानश्चार्याणां धर्मो निरूपितश्चेत् तत एव तथाविधधर्म्मचारिणां तेषां मनोधर्म्मा व्यवहाररीतयश्च समुन्नीता भवेयुः। एवं चेतिहासोऽप्यवगतो भविष्यति। ननु श्रुत्यादिग्रन्थपर्यालोचनयैव प्रकृतार्थसिद्धौ विफलोऽयमुपक्रम इति चेत्। न। विप्रकीर्णानां नवनीतकणानां दध्नि विद्यमानत्वेऽपि दधिमन्थनादेरिवास्य प्रयत्नस्य सफलत्वसम्भवात्। निजकारणाद्दध्नो नवनीतस्येव श्रुत्यादितोऽस्य प्रारिप्सितसन्दर्भस्य रसविशेषोपजनकत्वावश्यंभावाच्च।

अथार्यसंमतसृष्टिविचारः।

अथात्र कीर्त्यते पूर्वं लोकायात्रार्यसम्मता।
या निर्वहति देवस्य सर्वज्ञस्य प्रभावतः॥

तत्र तावल्लोको नाम स्थावरजङ्गमात्मकं विश्वम्। लोक्यते दृश्यतेऽनुभूयते यदिति कर्मव्युत्पत्तिस्वीकरणात्। यदिदमपारचमत्कारनिधानमखिलं जगत् स्थितिकाले तत्तल्लोकगतैः प्राणिभिरनुभूयते तदिदं सृष्टेः प्राक् बीजे वटद्रुमवन्निजकारणवस्तुनि प्रलीनं नामरूपवैचित्र्यविहीनं केवलमव्यक्तस्वभावं सत्यज्ञानानन्दलक्षणब्रह्मात्मवस्तुस्वरूपेणैवासीत्। तथा च श्रूयते। 'तद्धेदं तर्ह्यव्याकृतमासीत्' (बृह० उ० १।४।७) इति, 'सदेव सोम्येदमग्र आसीत्' (छा० उ० ६।२।१) इति च। ततश्च स परमात्मा आकाशादिभूतपञ्चकसृष्टिक्रमेण सकलं जगत् ससर्जेति तैत्तिरीयश्रुतिरावेदयति 'तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः, आकाशाद्वायुः वायोरग्निः अग्नेरापः अद्भ्यः पृथिवी पृथिव्या ओषधयः ओषधीभ्योऽन्नम्' (तै० उ० २।१।१) इत्यादिना।

सद्रूपं ब्रह्मैव च जगत्सिसृक्षासंवलितं सत् कारणतामापन्नं हिरण्यगर्भ इति प्रजापतिरिति ब्रह्मा स्वयम्भूरित्यादिशब्दैः श्रुत्यादिषु गीयते। यथा ऋग्वेदेऽष्टमाष्टकस्य सप्तमाध्यायगतसप्तमे वर्ग-

हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत् ।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥
ऋ० १० । १२१ । १)

इति श्रूयते । तथा ऐतरेयब्राह्मणेऽपि 'प्रजापतिरकामयत प्रजायेय भूयान्स्यामिति स तपोऽतप्यत स तपस्तप्त्वेमाँल्लोकानसृजत अम्भोमरीचीरापोऽदोऽम्भः परेण दिवं द्यौः प्रतिष्ठान्तरिक्षं मरीचयः पृथिवी मरो या अधस्तात्ता आपस्तदेतावतीर्वा इमास्तावतीर्वा इदं सर्वं यावदिदं तत्सृष्ट्वा तदेवानुप्राविशत्तदनुप्रविश्य सच्च त्यच्चाभवन्निरुक्तं चानिरुक्तं च निलयनं चानिलयनं च विज्ञानं चाविज्ञानं च सत्यं चानृतं च सत्यमभवद्यदिदं किं च तत्सत्यमित्याचक्षते तदनृतमित्यथ योऽसावादित्ये पुरुषो योऽयं दक्षिणेऽक्षन्पुरुषो यश्चैवोभयान्तरेण सन्नेतदात्मानमनुप्राविशत्तदनुप्रविश्य सच्च त्यच्चाभवन्निरुक्तं चानिरुक्तं च निलयनं चानिलयनं च विज्ञानं चाविज्ञानं च सत्यं चानृतं च सत्यमभवद्यदिदं किं च तत्सत्यमित्याचक्षते तदनृतमित्यथ यत्रैतदूर्ध्वमुदितं मनुष्यं वहति तस्य पुरस्ताद्यानि करणानि प्रविशन्ति तानि प्रविश्य सच्च त्यच्चाभवन्निरुक्तं चानिरुक्तं च निलयनं चानिलयनं च विज्ञानं चाविज्ञानं च सत्यं चानृतं च सत्यमभवद्यदिदं किं च तत्सत्यमित्याचक्षते तदनृतमित्यथ यत्रैतदस्तमितं मनुष्यं वहति तस्य पुरस्ताद्यानि करणानि प्रविशन्ति तानि प्रविश्य सच्च त्यच्चाभवन्निरुक्तं चानिरुक्तं च निलयनं चानिलयनं च विज्ञानं चाविज्ञानं च सत्यं चानृतं च सत्यमभवद्यदिदं किं च तत्सत्यमित्याचक्षते तदनृतमित्यथ यत्रैतदुदपात्रं प्रतिहरति तस्य पुरस्ताद्यानि करणानि प्रविशन्ति तानि प्रविश्य सच्च त्यच्चाभवन्निरुक्तं चानिरुक्तं च निलयनं चानिलयनं च विज्ञानं चाविज्ञानं च सत्यं चानृतं च सत्यमभवद्यदिदं किं च तत्सत्यमित्याचक्षते तदनृतमित्यथ यत्रैतदुदपात्रं प्रतिहृतं भव

तस्मिन् जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः ॥
[1]आपो नारा इति प्रोक्ता आपो वै नरसूनवः ।
ता यदस्यायनं पूर्वं तेन नारायणः स्मृतः ॥
यत्तत्कारणमव्यक्तं लोके सदसदात्मकम् ।
तद्विसृष्टः स पुरुषो लोके ब्रह्मेति गीयते ॥
तस्मिन्नण्डे स भगवानुषित्वा परिवत्सरम् ।
स्वयमेवात्मनो ध्यानात्तदण्डमकरोत् द्विधा ॥
ताभ्यां स शकलाभ्यां च दिवं भूमिं च निर्ममे ।
मध्ये व्योम दिशश्चाष्टावपां [2]स्थानं च शाश्वतम् ॥ (मनु० १ । ६-१३)

इत्याद्यभिधायाग्रे उक्तम् ।
[3]द्विधा कृत्वात्मनो देहमर्धेन पुरुषोऽभवत् ।
अर्धेन नारी तस्यां स विराजमसृजत्प्रभुः ॥
तपस्तप्त्वासृजद्यं तु स स्वयं पुरुषो विराँट् ।
तं मां वित्तास्य सर्वस्य स्रष्टारं द्विजसत्तमाः ॥ (मनु० १ । ३२-३३) इति ।

एवमादिभ्यः श्रुतिस्मृत्यादिवाक्यकदम्बेभ्यो भूतं भवद्भविष्यच्च सर्वमपि विश्वं सर्वज्ञात्सर्वशक्तिमतः परमात्मनः सकाशाद्धिरण्यगर्भमनुप्रभृतिपरम्परया सम्भवतीत्येवंविधः श्रुतिस्मृत्यादिनिबद्धो घण्टापथः ॥

अथार्यजनानामुत्पत्तिस्थानविचारः ।

अथार्यजनानां मूलोत्पत्तिस्थानं कुरुक्षेत्रादयो भूप्रदेशाः । तथा चोक्तं मनुना—

श्चाहैमत्वस्य प्रत्यक्षत्वात् उपचाराश्रयणम् ।

१ इदानीमागमसिद्धनारायणशब्दार्थनिर्वचनेन उक्तमेवार्थं द्रढयति । आपो नारा इति । नरसूनवः नराख्यस्य परमात्मनोऽपत्यानि । एतेनाप्सु नाराशब्दस्य अन्वर्था प्रवृत्तिरुपपादिता ।

२ अपां शाश्वतं स्थानं समुद्राख्यम् ।

३ द्विधा कृत्वेति । स ब्रह्मा निजदेहं द्विखण्डं कृत्वा । तस्यां नार्यां विराजं विराट्संज्ञं पुरुषं निर्मितवान् ।

४ स विराट् तपो विधाय यं निर्मितवान् तं मां मनुं जानीत अस्य सर्वस्य जगतः स्रष्टारम् ।

कुरुक्षेत्रं च मत्स्याश्च पञ्चालाः शूरसेनकोः ।
एष ब्रह्मर्षिदेशो वै ब्रह्मावर्त्तादनन्तरः ॥
एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः ॥ (मनु० २ । १९–२०) इति ।

कुरुक्षेत्रादिभूप्रदेशानां वेदेऽपि प्रशंसा श्रूयते । तथा च शतपथब्राह्मणस्य प्रवर्ग्यकाण्डे 'तेषां कुरुक्षेत्रं देवयजनमास तस्मादाहुः कुरुक्षेत्रं देवानां देवयजनम्' इति । तथा जाबालोपनिषत्स्वपि श्रूयते 'यदनु कुरुक्षेत्रं देवानां देवयजनं सर्वेषां भूतानां ब्रह्मसदनम्' (जा० उ० १) इति । किंच—

इमं मे गङ्गे यमुने सरस्वति
शुतुद्रि स्तोमं सचता परुष्ण्या ।
असिक्न्या मरुद्वृधे वितस्तयाऽऽ-
र्जीकीये शृणुह्या सुषोमया (ऋ० १० । ७५ । ५) इति ।
सिताऽसिते सरिते यत्र संगते
तत्राऽऽप्लुतासो दिवमुत्पतान्ति (ऋ० खि० १० । ७५ । १)

इत्यादिमन्त्रैर्ऋग्वेदादौ भरतखण्डान्तर्गतानां गङ्गायमुनादिनदीनां तत्र तत्र श्रवणात्त एते भूप्रदेशा अभिजनदेशा एवार्यजनानामिति स्फुटमेवावगम्यते । तथा कृष्णयजुःसंहितायाः प्रथमे काण्डेऽष्टमप्रपाठकस्य दशमेऽनुवाके श्रयते 'ये देवा देवसुवः स्थ त इममामुष्यायणमनामित्राय सुवध्वं महते क्षत्राय महत आधिपत्याय महते जानराज्यायैष वो भरता राजा सोमोऽस्माकं ब्राह्मणानां राजा' (तै० सं० १ । ८ । १०) इति । हे देवा अग्न्यादयो ये यूयं देवसुवो यजमानप्रेरकाः स्थ ते यूयमिमं यजमानमामुष्यायणम् अमुष्य देवदत्तस्य पुत्रममुष्य यज्ञदत्तस्य पौत्रं चानमित्राय शत्रुराहित्यार्थं सुवध्वम् अनुजानीध्वम् । किंच महते क्षत्रायानुत्तमक्षत्रियकुलाय महते आधिपत्याय अप्रतिहतनियमनसामर्थ्याय महते जानराज्याय जनसम्बन्धि यद्राज्यं तच्च सागरपर्यन्तभूमिविषयत्वान्महत् तस्मै सार्वभौमत्वाय सुवताम् अभ्यनुजानीताम्(?)। हे भरता राजन्यवैश्यादयो ध्रनिका एष यजमानो युष्माकं राजा । एनं स्वामिनं यथोचितं सेवध्वमित्यभिप्रायः । सोम उत्तमदेवोऽस्माकं ब्राह्मणानां राजा न त्वधमो यः क्षत्रियः इति श्रुत्यर्थः । राजसूययज्ञाङ्गभूतोऽभिषेचनीय-

यागे ब्रह्माऽभिधान ऋत्विक् क्षत्रियवैश्यप्रभृतीन् भरतखण्डोद्भवान् वर्णाननेन मन्त्रवाक्येनावेदयति । ततश्चावगम्यते भरतखण्डमभिजनदेश आर्यप्रजाया इति ॥

अत्र केचिद्वदन्ति । आर्यजनानां हिन्दुपदव्यपदेश्यता हि देशान्तरभवत्वं साधयति । तथा हि । पुरा किल कदाचित्समये जलप्रलयो बभूव । तत्र यद्यपि मनुष्यादयः सर्वे प्राणिनः जले निमग्नाः सन्तः पञ्चत्वमापेदिरे । तथापि काकेससनामके पर्वते काश्चिदेकः पुरुषो जीवन्नवशिष्टः । तस्य च सन्तानलतायाश्चिरकालेन प्रवर्द्धमानाया एकः प्रतानो यूरोपखण्डं प्रविवेशाऽपरश्च पारसीकदेशम् । ततश्च भूयसा कालेन पारसीकदेशमभिव्याप्नुवन् प्रवर्द्धमानः स लताप्रतानः सिन्धुनदस्योभे तटे समाश्रित्य प्रतिष्ठामलभत् (?=अलभत)। प्रतिष्ठितानां तत्पुरुषवंश्यानां देशनाम्ना सिन्धुपदेन व्यपदेशे कर्त्तव्ये करणाऽपाटववशात् प्राकृतजनैर्हिन्दुपदेन व्यपदेशश्चक्रे । त एवैते भरतखण्डवास्तव्या आर्यजनाः सन्ति । न ह्येषां मूलस्थानं भरतखण्ड इति ।

सेयं कल्पना न सर्वांशतः सम्भवतुलामधिरोहति । तस्य जलप्रलयस्याऽसार्वत्रिकत्वे एकस्यैव विवक्षितपुरुषस्यावशिष्टत्वासम्भवात् । सार्वत्रिकत्वे तु यमाश्रित्य प्राणान् स पुरुषो दधार स एवैकः पर्वतः प्रलयपयोधिजलैर्न प्लावित इति भाषणस्य बालजनश्रवणीयतया प्रेक्षावतामश्रद्धेयत्वात् । किञ्च स्वदेशं विहाय यथाकथंचिद्देशवशाद्भारतं वर्षं प्रविशद्भिरनार्यैः प्रथमं सिन्धुदेशवासिभिरेवार्यजनैः परिचयः संवृत्त इति तेनैव देशनाम्ना सर्वेषामार्याणां संज्ञाव्यवहारस्तैः कृतः स्यादित्यपि कल्पयितुं शक्यते । अथेयं प्रस्तुतवार्त्ता यथाकथंचिन्मूलमासाद्यांशतस्तु प्रमाणपदवीमधिरोहति । तथा च शतपथब्राह्मणे भारतरामायणादौ च मत्स्याऽवतारकथा गीयते । तत्र च कतिपयमद्वर्षिजनपरिवारेण मनुनाऽध्यासितां नावं निजैकशृङ्गनिबद्धामुद्वहता भगवता स्वीकृतमहामत्स्यरूपेण परमेश्वरेण सपरिवारो मनुः प्रलयपयोधिप्रचण्डतरङ्गताण्डवात् परित्रात इति । ततश्चातिक्रान्ते प्रलयकालसंकटे परमेश्वरप्रसादावाप्तसमस्तस्वस्पत्समृद्धो मनुः पुत्रपौत्रादिवंशपरम्परया सर्वेषां जनानां मूलपुरुषः सम्बभूव । तन्मूलक एव च सर्वेषां द्विपदजातीनां जनानां मनुजमनुष्यमानवादिपदैः सनातनो लोकव्यवहारः सम्बभूवेत्याहुः ॥

यत्तु केचिद्वदन्ति

मनुष्या मनुतो जाता मनुर्देवतनृद्भवः ।
देवानां वसतिः स्वर्ग इति श्रुत्यादिसम्मतम् ॥

ततश्चावगम्यते हिमालयगिरेरुत्तरभूप्रदेशा एवार्याणां मूलोत्पत्तिस्थानम् । यतस्तत्र भूप्रदेशेषु तिबेट इतिनाम्ना प्रख्यातो भूप्रदेशोऽद्यापि विद्यते । तिबेटइति हि त्रिविष्टपशब्दस्यैवाऽपभ्रंशो भवेत् । त्रिविष्टपशब्दश्च स्वर्गपर्याय इति प्राक्कार्थसिद्धिरिति । तत्त्वापाततो रमणीयम् । तिबेटशब्दस्य त्रिविष्टपशब्दाऽपभ्रंशरूपत्वेऽपि भूलोकगतस्य तद्देशस्यार्यजनसंमतस्वर्गत्वे मानाभावात् । भूलोकादन्तरिक्षलोकाच्च पृथगेव स्वर्गलोक इत्यर्थस्य श्रुतिस्मृत्यादिसकलप्राचीनग्रन्थेषु कोशकाव्याद्यर्वाचीननिबन्धेषु च विस्पष्टमभिधानाच्च । हिमालयोत्तरभूप्रदेशा अप्यार्याणामेव देशाः । नहि ते अनार्यनिवासस्थानभूता इत्यार्यजना मन्यन्ते किन्तु पावनानि धर्मक्षेत्राण्येवेति । अत एव महाभारतादौ श्वेतगिरिकैलासमानससरोवरादीन्युत्तरकुरुनामकप्रदेशाश्च तीर्थयात्रादिप्रस्तावे देवानामाक्रीडस्थानत्वेन तत्र तत्र स्तूयन्ते । न ह्येवं प्रशंसामात्रेण इमे पवित्रतीर्थप्रदेशा एव स्वर्गलोको नातः परः काश्चिद्देवनिवासः स्वर्गोऽस्तीति श्रुत्यादिसिद्धान्तो वक्तुं शक्यते । 'प्रजापतिरकामयत प्रजायेय भूयान् स्यामिति स तपोऽतप्यत स तपस्तप्त्वेमाँल्लोकानसृजत पृथिवीमन्तरिक्षं दिवम्' (ऐ० ब्रा० ५ । ३२) इत्यादिपूर्वोदाहृतश्रुतिस्मृत्यादिविरोधात् ।

यदपि वदन्ति

शतं जीव शरदो वर्द्धमानः शतं हेमन्ताञ् छतमु वसन्तान् ।
(ऋ० १० । १६१ । ४)

इत्यादिमन्त्रैर्बहुशो वेदे हेमन्तशतमानमायुः प्रार्थ्यते ततश्च शीतप्रदेशवार्त्तिन एवैते आर्या भवेयुरिति कल्प्यत इति । तदपि दुर्बलम् । भरतखण्डीयभूप्रदेशानां हेमन्तपरिचयाऽयोग्यत्ववत्संतोष्णप्रदेशत्वाभावात् । किंच भरतखण्डान्तर्गतानां देशानां ब्रह्मावर्त्तार्यावर्तब्रह्मर्षिदेशादिपदैरन्वर्थाः संज्ञा मन्वादिभिः स्मर्यन्ते । ब्रह्माणो ब्राह्मणा आवर्त्तन्ते उद्भवन्त्यत्रेति ब्रह्मावर्त्तः, आर्या आवर्तन्ते अत्रेत्यार्यावर्तः, ब्रह्मर्षीणां देशो मूलनिवासस्थानं ब्रह्मर्षिदेश इत्येवं संज्ञापदानामर्थः स्फुटमेवावेदयति भरतखण्डमप्यार्याणां मूलत एव जन्मभूमिरिति ।

आ ब्रह्मभुवनाल्लोकात् पुनरावर्त्तिनोऽर्जुन ।
मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते ॥ (भ० गी० ८ । १६)

इत्यादिस्मृतिषु 'न स पुनरावर्त्तते' (का० उ० २) इत्यादिश्रुतिषु च उत्पत्तिसमानार्थकत्वेनैवावर्त्तनशब्दस्य प्रसिद्ध्या प्रकृते आगमनरूपार्थकत्वकल्पनमनुचितमित्याहुः । युक्तं चैतत् । अन्यथा 'तस्मिन् देशे य आचारः पारम्पर्यक्रमागतः' (मनु० २ । १८) इत्यनेन 'एतद्देशप्रसूतस्य सकाशादग्रजन्मनः' (मनु० २ । २०) इत्यनेन च समनन्तरोदाहृतमनुवचनेन विरोधापत्तेश्च ॥

अथ ब्राह्मणादिजातिविवेकविचारः ।

अथायं ब्राह्मणादिजातिविवेकः पुरातनोऽर्वाचीनो वेति सम्प्रधारणायामुच्यते पुरातन एवायं जातिविवेको नार्वाचीन इति । तथा चोक्तं मनुस्मृतिदशमेऽध्याये—

ब्राह्मणः क्षत्रियो वैश्यस्त्रयो वर्णा द्विजातयः ।
चतुर्थ एकजातिस्तु शूद्रो नास्ति तु पञ्चमः ॥
सर्ववर्णेषु तुल्यासु पत्नीष्वक्षतयोनिषु ।
आनुलोम्येन सम्भूता जात्या ज्ञेयास्त एव ते (मनु० १० । ४-५)

इति । ब्राह्मणादित्रयो वर्णा द्विजातयो द्विजन्मानः सन्ति । तेषां द्वितीयजन्मरूपोपनयनसंस्कारविधानात् । शूद्रः पुनश्चतुर्थो वर्ण एकजातिरेव । तस्योपनयनसंस्काराभावात् । पञ्चमस्तु न कोपि वर्णोऽस्ति । सङ्कीर्णजातीनां त्वश्वतरवन्मातृपितृजातिव्यतिरिक्तजात्यन्तरत्वेन वक्ष्यमाणत्वादिति भावः । गवाश्वादीनामिव ब्राह्मणादीनां जात्यभिव्यञ्जकावयवविशेषस्याभावात्तेषां लक्षणं स्मर्यते सर्ववर्णेष्विति । ब्राह्मणादिषु चतुर्ष्वपि वर्णेषु समानजातीयासु यथाशास्त्रं परिणीतासु अक्षतयोनिषु आनुलोम्येन ब्राह्मणेन ब्राह्मण्यां क्षत्रियेण क्षत्रियायामित्येवमनुक्रमेण ये जातास्ते मातापित्रोर्जात्या ब्राह्मणत्वादिरूपया युक्तास्तत्तज्जातीया एव ज्ञातव्या इत्यर्थः । अत्र पत्नीग्रहणादन्यस्य पत्न्यां सवर्णेनाप्यन्यपुरुषेण जारधर्मतो जनितानां ब्राह्मणादिजातिमत्त्वं नास्तीति मन्वाशयः । तथा च देवलः ।

द्वितीयेन तु यः पित्रा सवर्णायां प्रजायते ।
अवावट इति ख्यातः शूद्रधर्मा स जातितः ॥
व्रतहीना न संस्कार्याः स्वतन्त्रा अपि ये सुताः ।
उत्पादिताः सवर्णेन व्रात्या इव बहिष्कृताः ॥ इति ।

तथा याज्ञवल्क्योऽपि 'सवर्णेभ्यः सवर्णासु जायन्ते हि द्विजातयः' (या० स्मृ० १ । ९०) इत्यभिधाय 'विन्नास्वेष विधिः स्मृतः' (या० स्मृ० १ । ९२) इति वदन् पत्युः सकाशादुत्पादितस्यैव ब्राह्मणादिजातिमत्त्वं निश्चिकाय । न च स्मृतिप्रसिद्धा एव ब्राह्मणादिजातयो न वेदबोधिता इति वाच्यम् । स्मृतीनां वेदमूलकत्वात् । वेदेऽपि ब्राह्मणादिजातिवाचकाः शब्दा बहुश उपलभ्यन्ते । तथाहि ऋग्वेदे 'ब्रह्माणस्त्वा शतक्रत उद्वंशमिव येमिरे' (ऋ० १ ।१०। १) इति, 'पञ्च जना मम होत्रं जुषध्वम्' (ऋ० १० । ५३ । ४) इति, 'यत्पाञ्चजन्यया विशा (ऋ० ८ । ६३ । ७) इति, 'त्यान् नु क्षत्रियाँ अव आदित्यान्याचिषामहे' (ऋ० ८ । ६७ । १) इति च श्रूयते । पञ्चजनाः 'चत्वारो वर्णा निषादः पञ्चमः' (नि० ३ । ८) इति हि नैरुक्ते व्याख्यातं यास्केन । तत्र निषाद इति सर्वासां सङ्करजातीनामुपलक्षणम् । निषादस्य सङ्कीर्णजातित्वात् । यदाह मनुः

ब्राह्मणाद्वैश्यकन्यायामम्बष्ठो नाम जायते ।
निषादः शूद्रकन्यायां यः पारशव उच्यते॥ (मनु० १०। ८) इति ।

कन्याग्रहणादूढायामित्यध्याहार्यम् । 'विन्नास्वेष विधिः स्मृतः' इति याज्ञवल्क्येन स्फुटीकृतत्वात् ।

अथ चीनयवनादीनामुत्पत्तिकथनम् ।

अम्बष्ठनिषादादिजातिवच्छकयवनचीनादिजातयोऽपि ब्राह्मणादिवर्णेभ्य एवोद्भता इत्यार्या मन्यन्ते । यथाह मनुर्दशमेऽध्याये

शनकैस्तु क्रियालोपादिमाः क्षत्रियजातयः ।
वृषलत्वं गता लोके ब्राह्मणादर्शनेन च ॥
पौण्ड्रकाश्चोड्द्रविडाः काम्बोजा यवनाः शकाः ।
पारदाः पह्लवाश्चीनाः किराताः दरदाः खशाः ॥ इति ।
मुखबाहूरुपज्जानां या लोके जातयो बहिः ।

---

१ इमा वक्ष्यमाणाः पौण्ड्रकादयो मूलतः क्षत्रियजातय एव राज्यलोभवशाद् दूरदेशान्तरं पराक्रान्ताः सन्तः क्रियालोपेनोपनयनादिसंस्कारकर्मलोपेन याजनाध्यापनप्रायश्चित्ताद्यर्थं ब्राह्मणानां दर्शनाभावेन च शनैः शनैर्लोके शूद्रतां प्राप्ता इत्यर्थः । पौण्ड्रका इत्यादेः पौण्ड्रादिदेशोद्भवा इत्यर्थः ।

२ ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः । ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायतेति यजुरन्त्रश्रवणान्मुखबाहूरुपज्जा ब्राह्मणक्षत्रियवैश्यशूद्रास्तेषां क्रियालोपादिनिमित्तेन या जातयो बहिः स्वस्वमण्डलबहिर्भूता जाता म्लेच्छभाषायुक्ता आर्यभाषोपेता वा सन्ति ते सर्वे दस्यवः स्मृताः । यथा सुवर्णस्तेयी

म्लेच्छवाचश्चार्यवाचस्ते सर्वे दस्यवः स्मृताः ॥
(मनु० १० । ४३-४५) इति च ।

इदमत्र विचारणीयम् । राज्यादिलोभेन देशान्तरं प्रति संक्रान्तानां शकयवनादीनां भाषास्वरूपतारतम्यपरीक्षणे क्रियमाणे पितृमातृस्वसृभ्रातृदुहितृप्रभृतयोऽनेके गीर्वाणभाषाशब्दा अपभ्रष्टाः सन्तः स्वल्पयाऽऽनुपूर्व्या विभिन्नास्तत्तद्भाषासूपलभ्यन्ते । ततश्चानुमातुं शक्यते यथा सर्वेषामेषां कदाचित्समये मूलकुटुम्बमेकमेव भवितुमर्हतीति । तदेवमनुमितार्थस्योदाहृतामिदं मानववचनद्वयं संवादकामिति । तथा चातुर्वर्ण्यातिरिक्ताः सर्वा अपि मनुष्यजातयो व्यभिचारादिदोषसम्भवाः सामान्यतो वर्णसङ्करपदेनाभ्यधीयन्त दशमेऽध्याये मनुना

व्यभिचारेण वर्णानामवेद्यावेदनेन च ।
स्वकर्मणां च त्यागेन जायन्ते वर्णसङ्कराः ॥ (मनु० १०।२४) इति ।

एवं च पृथिव्यां सर्वेऽपि मानवा आर्यकुलत एव समुद्भूताः, परन्तु यैर्दुर्दैववशात् स्वकर्माणि तत्यजिरे तेषामार्यत्वं प्रलुप्तं बभूवेति ध्येयम् । अत एव ब्राह्मणादय आर्यजना यत्र न निवसन्ति ते जनपदा निन्दितेन कीकटादिशब्देन व्यपदिश्यन्ते वेदे । यथा 'किं ते कृण्वन्ति कीकटेषु गावः'(ऋ० ३ । ५३ । १४) इति । व्याख्यातश्चायं मन्त्रो नैरुक्तग्रन्थे षष्ठाध्यायस्य द्वात्रिंशे खण्डे यास्केन 'किं ते कुर्वन्ति कीकटेषु गावः । कीकटा नाम देशोऽनार्यनिवासः । कीकटाः किंकृताः किं क्रियाभिरिति प्रेप्सा वा' इति ॥

अथार्याणामुत्पत्तिकालविचारः ।

अथार्यप्रजोत्पत्तेः कियान् कालः समतीयायेति चेन्नासौ कालनियमः परिच्छेत्तुं शक्यते । प्रत्यक्षादीनां प्रमाणानामनुपलम्भात् । अनुमानतोऽपि वर्षसङ्ख्यां समधिगन्तुं सद्धेतुरन्वेषणीयः । सोऽपि न कश्चिद्यथावस्थितो निर्दोषः प्रसरति । वेदेऽपि हि ब्राह्मणानामार्यपदव्यपदेश्यता श्रूयते । तथा च ऋग्वेदे तृतीयाष्टकस्य षष्ठेऽध्याये 'अहं भूमिमददामार्यायाहं वृष्टिं दाशुषे मर्त्याय' (ऋ० ४ । २६ । २) इति । अत्र वामदेवऋषिर्निजतपोबलेन स्वात्मनि सर्वात्मतामनुभूय प्रोवाच । अहं प्रजापतिरूपः आर्यायाङ्गिरसे भूमिं दत्तवान् । अह-

---

धर्मापराधी तथैव क्रियालोपादिकारिणोऽपि धर्मापराधिन इति गुणयोगाच्चचया दस्युपदव्यवहार्याः सन्तीति भावः ।

मिन्द्ररूपः सन् दाशुषे हविर्दत्तवते मर्त्याय वृष्टिं दत्तवानिति तदर्थः। एवं च ऋग्वेदकालेऽपि आर्याणां प्रसिद्धत्वात्ततोऽपि पुरातनं किंचित्प्रमाणमार्योत्पत्तिप्रदर्शकं यद्युपलभ्येत तर्हि चिकीर्षितानुमानं सिध्येत्, तदेव तु नोपलभामहे ॥

अथ पुरातनानामार्यजनानां विद्याशिल्पादिविज्ञाननिरूपणम् ।

स्यादेतत् । वर्त्तमानकालभवप्रजाभ्यः संवत्सरशतात् प्राक्तना जना अप्रगल्भा आसन्निति जनश्रुत्युपलम्भादतिपुरातन्यः प्रजा विद्याशिल्पादिकुशलत्वहीनाः केवलं पशुकल्पा अभूवन्निति निश्चेतुं शक्यते इति चेन्मैवम् । प्रमाणाभावात् । प्राचीनलोकस्थितेरुपदर्शकेभ्यः सकलप्रमाणवस्तुभ्यः पुरातनत्वेन सर्वसम्मताद्वेदपुस्तकात् तु तदानीन्तनानामपि जनानां विद्याशिल्पादिकुशलत्वावगमाच्च । युक्तं चैतत् । यतोऽत्र लोके मनुष्याः प्रथमं तावदन्नमाच्छादनं च नियमेन कामयन्ते ततो निवासाय सदनमित्येवं क्रमः सर्वानुभवसिद्धः । एतत्त्रितयलाभेन निर्व्यूढदेहयात्राः कलत्रपुत्रादिसुखं कामयमाना जना यं यं काममविन्दन्त तत्र तत्रालंबुद्धिविधुराः सांसारिकसुखविवृद्धये निजनैसर्गिकस्वभावत एव नानाविधोद्यमेषु सयत्नाः सन्तो यथेदानीन्तनाः समधिगतविविधविद्याशिल्पादिकौशला उपलभ्यन्ते तथैव पुरातना अपि जना निजनैसर्गिकस्वभाववशादेव स्वस्वबुद्ध्यनुसारेण प्रवर्त्तमानाः सन्तोऽधिगतविद्याशिल्पादयो बभूवुरिति प्रत्येतुं शक्यते ।

प्रोक्तार्थप्रत्यायकानि कानि चिद्वेदवाक्यान्युदाह्रियन्ते । यथा ऋग्वेदतृतीयाष्टकस्याष्टमेऽध्याये 'शुनं वाहाः शुनं नरः शुनं कृषतु लाङ्गलम्' (ऋ० ४ । ५७ । ४) इति श्रूयते । वाहा बलीवर्दाः शुनं सुखं यथा स्यात्तथा भारं वहन्तु । नर इति नृशब्दस्य प्रथमाबहुवचनान्तम् । कर्षुका नराः शुनं यथा स्यात्तथा कृषिकर्म कुर्वन्तु । लाङ्गलं नाम अयोमुखं भूविदारकं काष्ठं कृषतु भुवं विदारयत्वित्यर्थः। अत्राद्यवाक्यद्वये क्रियापदयोरश्रवणेऽप्यौचित्यादध्याहर्त्तव्ये ।

[1]सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः ।

---

१ सामर्थ्यं निर्दिष्टजननशक्तिः कारणता वा । औचिती प्रकृतोपयोगित्वं योग्यता वा । देशः समभिव्याहृतप्रदेशः । कालः समभिव्याहृतदिनरात्र्यादिः । व्यक्तिः शब्दस्य पुंस्त्वादि लिङ्गम् । स्वर उदात्तादिः । शब्दार्थस्यानवच्छेदे तात्पर्यसन्देहे तदपाकरणद्वारेण विशेषस्मृतिहेतवो निर्णयहेतव इत्यर्थः । अत्र विशेषस्तु साहित्यदर्पणस्य द्वितीयपरिच्छेदे द्रष्टव्यः । (मं० दे० शा०) ।

शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः ॥ (वाक्यप० का० २)
इति सिद्धान्तात् । यथा
यश्च निम्बं परशुना यश्चैनं मधुसर्पिषा ।
यश्चैनं गन्धमाल्याद्यैः सर्वस्य कटुरेव सः ॥
इति पद्ये छिनत्ति सिञ्चति अर्चतीति क्रियापदानामौचित्याद्-ध्याहारस्तथा प्रकृतश्रुतिवाक्ययोरपीति बोध्यम् । तथा ऋग्वेदप्रथ-माष्टकस्य द्वितीयेऽध्याये—
स्योना पृथिवि भवानृक्षरा निवेशनी ।
यच्छा नः शर्म सप्रथः ॥ (ऋ० १ । २२ । १५) ।
इति श्रूयते । हे पृथिवि त्वमस्मान् प्रति स्योना शिवा अनृक्षरा निष्कण्टका निवेशनी स्थानप्रदा च भव, किंच नोऽस्मभ्यं सप्रथो विशालं शर्म गृहं यच्छ देहीत्यर्थः । भव यच्छेत्यनयोः पदयोः संहिताकाले दीर्घश्छान्दसः । एवमादिश्रुतिवाक्यपर्यालोचनया तदानीन्तना जनाः कृष्यादिना विविधानि धान्यानि समुत्पाद्य गिरिकाननादौ ग्रामनगरादौ वा सदनान्याबध्य निजनिर्वाहं चक्रु-रिति प्रतीयते । न च तदानीं पुरग्रामादिव्यवस्था नासीदिति वाच्यम् ।
शतमश्मन्मयीनां पुरामिन्द्रो व्यास्यत् ।
दिवोदासाय दाशुषे (ऋ० ४ । ३० । २०)
इति ऋग्वेदतृतीयाष्टकस्य षष्ठाध्यायगतायां श्रुतौ पाषाणचिता-नां पुरां नगरीणां शतं दिवोदासनाम्ने दाशुषे निजयाजकायेन्द्रो व्यास्यदत्तवानिति स्फुटमभिधानात् । तथा ।
इमां रुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मतिम् ।
यथा नः शमसद् द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्ननातुरम् ॥
[तै० सं० ४ । ५ । १०] इति कृष्णयजुर्वेदस्य चतुर्थकाण्डस्य पञ्च-माध्यायगतश्रुतिवाक्ये ग्रामपदश्रवणाच्च । श्रुत्यर्थस्तु । नोऽस्माकं द्विपदे मनुष्यवर्गाय भार्यापुत्रादिरूपाय चतुष्पदे पशुवर्गाय गवाश्व-महिष्यादिरूपाय च शं सुखम् असत् स्यात् । किंचास्मिन् ग्रामे विश्वं सर्वं प्राणिजातं पुष्टं सुखपूर्णमनातुरमुपद्रवरहितं च यथा भवेत्तथा वयं रुद्राय देवाय इमां मतिं पूजाध्यानादिविषयां बुद्धिं प्रभरामहे प्रकर्षेण पोषयामः । कीदृशाय रुद्राय तवसे बलवते कपर्दिने जटा-बन्धयुक्ताय तापसाय वा क्षयद्वीराय क्षीयमाणप्रतिपत्तायेति । अपि च ऋग्वेदे प्रथमाष्टकस्य द्वितीयेऽध्याये 'तच्छन्नासत्याभ्यां परिज्मानं

सुखं रथम्' [ऋ० १।२०।३] इति श्रूयते। अश्विनीकुमारार्थमृभवः सुखं सुखकारकं परिज्मानं सर्वतःसञ्चरणक्षमं रथं तक्षाणिर्मितवन्त इति तदर्थः। एवं तत्र तत्रर्ग्वेदमन्त्रेषु तन्तुवायकर्मारादिसम्बन्धिशिल्पक्रियाणां रूपकविधया दृष्टान्तमर्यादया वोपन्यासात्, कृष्णयजुःसंहितायाश्चतुर्थकाण्डे षष्ठ[?]प्रपाठके 'वाजश्च मे प्रसवश्च मे प्रयतिश्च मे प्रसितिश्च मे' [तै० सं० ४।७।१] इत्यादिश्रुतिवाक्यकदम्बेन संसारोपयोगिनां नानाविधवस्तूनामभ्यर्थनीयत्वेनोपन्यासाच्च विविधशिल्पक्रियाणामनेकवस्तूनां च प्रकृष्टः परिचयः प्राचां बभूवेति निश्चीयते। नहि खपुष्पशशविषाणादयोऽलीकपदार्थाः कस्यापि कदाप्याशाविषया भवितुमर्हन्ति। तेषामत्यन्तासत्त्वेन परिचययोग्यत्वात्। वर्णनाभ्यर्थनादिकं च स्वविषयभूतवस्तूनामुत्पादिका विविधशिल्पक्रियाः समाक्षिपति। जन्यस्य वस्तुजातस्याकस्मादुद्भूतस्याननुभवेनानुपपद्यमानत्वेन च यथायोग्यकारणसामग्रया अवश्यापेक्षणीयत्वात्।

भूयसा वस्नमचरत्कनीयोऽविक्रीतो अकानिषं पुनर्यन्।
स भूयसा कनीयो नारिरेचीद्दीना दक्षा वि दुहन्ति प्र वाणम्॥
[ऋ० ४।२४।९]

इति ऋग्वेदे तृतीयाष्टकस्य षष्ठाध्याये श्रूयते। तथा तत्रैव वेदे प्रथमाष्टकस्य द्वितीयेऽध्याये।

वेदा यो वीनां पदमन्तरिक्षेण पतताम्।
वेद नावः समुद्रियः॥ (ऋ० १।२५।७) इति।

---

१ कश्चिद्विक्रेता भूयसा बहुमूल्येन वस्तुना कनीयः स्वल्पतरं वस्नं मूल्यम् अचरत्कृतवान्। ततश्च यन् एतीति यन् क्रेतारं प्रति गच्छन् सन्, अविक्रीतः द्रव्यविनिमयेनायं पदार्थस्तुभ्यं मया न दत्तः, पुनः अकानिषम् अधिकं धनं लब्धुं कामये। स पूर्वोक्तरीत्या विवदमानो विक्रेता भूयसा स्वरूपतो बहुमूल्यवस्तुनापि कनीयः विक्रयसमये स्वयमङ्गीकृतमल्पतरमपि मूल्यं नारिरेचीत् न वर्द्धयितुं शक्नुयात्। तत्र हेतुमाह चरमपादेन। दीना असमर्था दक्षाः समर्था वा प्र वाणं प्रतिपन्नं वचनं विदुहन्ति विशेषेण स्वेष्टप्रपूरणायावलम्बन्ते इत्यर्थः। वाचनिकेषु क्रयविक्रयव्यवहारेषु वचनमेव स्वत्वस्योत्पत्तौ निवृत्तौ वा निमित्तमिति भावः।

२ यो वरुणदेवः अन्तरिक्षेणाकाशमार्गेण पततां गच्छतां वीनां पक्षिणां पदं गम्यस्थानं वेद, तथा समुद्रियः सागरान्तर्वर्त्ती वरुणदेवः नावो नौका वेद जानातीत्यर्थः।

तथा अष्टमाष्टकस्य द्वितीयेऽध्याये ।

सुत्रामाणं पृथिवीं द्यामनेहसं सुशर्माणमदितिं सुप्रणीतिम् ।
दैवीं नावं स्वरित्रामनागसमस्रवन्तीमा रुहेमा स्वस्तये ॥
(ऋ० १० । ६३ । १०)

इति च श्रूयते । एवं तत्र तत्र मन्त्रेषु बहुशो वाणिज्यव्यवहारनिबन्धनाः क्रयविक्रयादिक्रिया नौकायानादिक्रियाश्च वर्णिता उपलभ्यन्ते । ततश्च तथाविधव्यापारा अपि तदानीन्तनैरनुसृता बभूवुरिति स्फुटमेवावगम्यते ।

अथोपस्थिते सङ्ग्रामप्रसङ्गे लोहमयकवचेन गुप्तगात्रस्य शत्रुपराजयाय समुद्यतस्य राज्ञः स्वरूपं धनुर्बाणाः सैनिकवीराश्चेत्येवमादिरूपा सङ्ग्रामसामग्री ऋग्वेदे पञ्चमाष्टकस्य प्रथमेऽध्याये

जीमूतस्येव भवति प्रतीकं यद्वर्मी याति समदामुपस्थे ।
अनाविद्धया तन्वा जय त्वं स त्वा वर्मणो महिमा पिपर्त्तु ॥
(ऋ० ६ । ७५ । १)

इत्यादिमन्त्राणां वर्गद्वयेन वर्णिता श्रूयते । तथा अष्टमाष्टकस्य पञ्चमाध्यायेऽपि

अस्माकमिन्द्रः समृतेषु ध्वजेष्वस्माकं या इषवस्ता जयन्तु ।

---

१ वयं यजमाना दैवीं नावमारुहेम । दिवः स्वर्गस्य इमां दैवीं द्युलोकप्रापिकां यज्ञमयीं नौकां स्वस्तये कल्याणार्थमारोहामः । प्रकृतां नावं विशिनष्टि—सुत्रामाणं सुष्ठुत्रायमाणां संरक्षणकर्त्रीमिति यावत् । पृथिवीं विशालां द्यां द्योतमानामनेहसं समयप्राप्तां सुशर्माणं सुष्ठुशरणभूतामदितिमखण्डितां सुप्रणीतिं सुष्ठुरीत्या गम्यस्थानप्रापिकां स्वरित्रां शोभनमरित्रं केनिपातकं महाराष्ट्रभाषया सुकाणुपदव्यपदेश्यं यस्यास्तथाविधाम् । अनागसं निर्दोषाम् अस्रवन्तीम् अन्तः प्रविशज्जलस्रावरहितां सूक्ष्मच्छिद्रैरपि वर्जितामिति यावत् ।

२ हे राजन् यत् यदा भवान् वर्मी कवचावृतवपुः सन् समदां सङ्ग्रामाणामुपस्थे मध्ये याति गच्छति तदा तव प्रतीकं वपुः जीमूतस्येव भवति । यथा निदाघपरितापशामकशीतलजलपूर्णस्य मेघस्य श्यामलं वपुः प्रचण्डमपि सर्वलोकानुग्राहकं तथा परचक्रपरितापशामकशौर्यपूर्णस्य तवापि लौहकवचावृतत्वेन श्यामलं वपुः प्रजानुग्रहायैव भवतीत्युपमातात्पर्यम् । अतस्त्वमनाविद्धया तन्वा अक्षतेन देहेन जय सर्वथा विजयमाप्नुहि । स त्वमित्थंविधो वर्मणः कवचस्य महिमा त्वां पिपर्त्तु पालयत्वित्यर्थः ।

३ इन्द्रोऽस्माकं ध्वजेषु समृतेषु सङ्गतेषु शत्रुसेनाध्वजैः सम्मिलितेषु सत्स्विति यावत् । जयमावहत्विति शेषः । समृतशब्दः सम्पूर्वकाद् ऋगतावित्य-

अस्माकं वीरा उत्तरे भवन्त्वस्माँ उ देवा अवता हवेषु
(ऋ० १० । १०३ । ११)

इत्यादयो मन्त्राः सङ्ग्रामख्यापकाः पठ्यन्ते । तथा ऋग्वेदे चतुर्थाष्टकस्य प्रथमेऽध्याये

कें ते अग्ने रिपवे बन्धनासः के पायवः सनिषन्त द्युमन्तः ।
के धासिमग्ने अनृतस्य पान्ति क आसतो वचसः सन्ति गोपाः॥
(ऋ० ५ । १२ । ४)

इति श्रूयते । तथा ऋग्वेदचतुर्थाष्टकस्य द्वितीयेऽध्याये

न सै राजा व्यथते यस्मिन्निन्द्रस्तीव्रं सोमं पिबति गोसखायम् ।
आ सत्वनैरजति हन्ति वृत्रं क्षेति क्षितीः सुभगो नाम पुष्यन्॥
(ऋ० ५ । ३७ । ४)

इति श्रूयते ।

किंच कृष्णयजुःसंहिताया प्रथमकाण्डे द्वितीयप्रपाठकस्य नवमानुवाके राजसूययज्ञाङ्गत्वेनानुष्ठेयं रत्निहोमाख्यं कर्म्म विधीयते । तच्च कर्म्म द्वादशभिरह्नोभिः साध्यम् । तत्र प्रथमेऽहनि यजमानो

स्माद्धातोः कर्तरि क्तप्रत्ययेन सिद्धः । अस्माकमिषवो बाणा जयन्तु । अस्माकं वीरा योद्धारः उत्तरे उत्कर्षवन्तो भवन्तु। हे देवा यूयमाहवेषु युद्धेषु अस्मानवत रक्षतेत्यर्थः ।

१ हे अग्ने ये पुरुषा रिपवे बन्धनासः शत्रुं निबध्नन्ति ते के इति प्रसिद्धविषयकः प्रश्नः । ते स्वदीयभक्ता एवेत्युत्तरं प्रसिद्धत्वादनुक्तमध्याहृत्य बोध्यम् । एवमग्रिमवाक्येष्वूहनीयम् । यद्वा हे अग्ने ते प्रसिद्धास्त्वदुपासकाः के किंविधाः सन्तीति न वक्तुं शक्यते । यतस्ते रिपवे बन्धनासः शत्रुं निबध्नन्ति । पायवः पालका द्युमन्तस्तेजस्विनः सनिषन्त दीनेभ्यो दानमकुर्वत । किंच हे अग्ने अनृतस्य धासिमसत्यस्य पोषकम् अनृतभाषणशीलमिति यावत् । के पान्ति सत्यभाषित्वं ग्राहयित्वा के रक्षन्ति । तथा असतः कुत्सिताचारान् वचसः सदुपदेशवचनेन । तृतीयार्थे व्यत्ययेन षष्ठी । गोपाः पालकाः के सन्ति । स्वदक्षा एवैवंभूता मान्ये इति भावः । आसत इत्यत्र संहिताकाले दीर्घश्छान्दसः । पदकाले असत इत्येव पदकाराः पठन्ति ।

२ यस्य राज्ञो यज्ञे गोसखायं दुग्धादिरसमिश्रं तीव्रं मादकं सोममिन्द्रः पिबति स राजा न व्यथते न दुःखमनुभवति । सत्वनैर्बहुजनैः सह आ समन्तात् अजति देशेषु सञ्चरति वृत्रं शत्रुं हन्ति । क्षितीर्ब्राह्मणादिप्रजाः क्षेति व्याप्नोति । सुभगः शोभनैश्वर्यसम्पन्नः पुष्यन् सर्वसमृद्धिपुष्टो भवतीत्यर्थः । नामेति निश्चयार्थे वाक्यालङ्कारे वा ।

ब्राह्मणगृहं गत्वा बृहस्पतिचरुणा यजते श्वेतपृष्ठं च वृषभं यज्ञाङ्गदक्षिणात्वेन ददाति। ततो द्वितीयेऽहनि क्षत्रियस्य गृहं, तृतीयेऽहनि महिष्याः, चतुर्थेऽहनि वावाताया:, पञ्चमेऽहनि परिवृक्तेः, षष्ठेऽहनि सेनापतेः, सप्तमेऽहनि सारथेः, अष्टमेऽहन्यन्तःपुराध्यक्षस्य, नवमेऽहनि ग्रामण्यः, दशमेऽहनि सङ्ग्रहीतुः, एकादशेऽहनि भागदुघस्य, द्वादशेऽहनि घृतकारस्य, गृहं गत्वा श्रुत्युक्तत्तद्धविर्भिः श्रुत्युक्तत्तद्देवता यजमानो यजते इत्युक्तम्। तत्र कृताभिषेका राजपत्नी महिषी, प्रिया राजपत्नी वावाता, अप्रिया राजपत्नी परिवृक्तिरित्यभिधीयते। ग्रामस्य नेता राजानियुक्तोऽधिकारी ग्रामणीः, कोशाध्यक्षः सङ्ग्रहीता, षष्ठांशादिरूपं राजग्राह्यभागं यो दोग्धि प्रजाभ्य आदत्ते स भागदुघ इत्युच्यते। अवशिष्टं स्पष्टम्।

एवं चैवमादिश्रुतिवाक्यपर्यालोचनया तदानीन्तना आर्यजनास्तेजस्विनः प्रजापालनदक्षा दीनानुकम्पिनः सन्मार्गप्रवर्त्तकाः शूराः शत्रुपराजयकुशलाः सर्वसुखेभ्यो विजयसुखं बहु मन्यमाना महोदारचरित्रा उत्तमायां पदव्यामवर्त्तिषतेति स्फुटमेव प्रतीयते। नहि वैदिकैः शब्दकदम्बैरभिव्याञ्जितान्युदारकृत्यानि क्षुद्राणां नरपशूनां सम्भवन्ति। किञ्च लोकोपद्रवकारिणश्चोरजारपिशुनपाखण्डिनो निगृह्य देशविप्लवकारिणः क्रूरखलान् संहृत्य सन्मार्गानुवर्त्तिनी प्रजा निजकुटुम्बवत्परिपाल्येत्येवं लोकहितं विधाय स्वस्थमनसो राजानो राजसूयादिभिर्महामखैर्देवान् यजन्तो बहव ऋग्वेदादौ सङ्कीर्त्तिताः श्रूयन्ते। ततश्चावगम्यते राजनीतिरपि तत्कालोचिता समीचीनैव तदानीमासीदिति। एवं स्थिते केचिदर्वाञ्चः स्वमनीषया यथेष्टं कल्पयित्वा पुरातनजनानामारण्यकपशुप्रायतां कथयन्ति तत्प्रमाणविधुरं वेदितव्यम्॥

अथ प्रसङ्गात् वर्णलिपिसमुद्भवविचारः।

अथास्यामीश्वरसृष्टौ प्रादुर्भवन्तो भावा भास्करादिप्रकाशेन यथा सुपरिचिता भवन्ति तथा ब्राह्मीसृष्टौ[1] प्रादुर्भवन्त्यो विविधविद्या अपि वर्णलिपिप्रकाशेनैव परिचयविषयाः संजायन्ते। नान्यथा। यद्यपि प्रतिभाविशिष्टाभिर्विबुद्धन्मनोवृत्तिभिः[2] प्रकाश्यमाना एव विविधोदारविचारा विद्यारूपेण परिणमन्ति, तथापि तेषां चिरकालमवस्थितिर्वर्णलिपिप्रकाशायत्तैव। मनोवृत्तीनां क्षणिकत्वेन चिरकालमेकरूपतयाऽवस्थानासम्भवात्। तथा च क्षणभङ्गुराभिस्ताभिः

---

१ सरस्वती। २ नवनवोन्मेषशालिता।

प्रकाशिता विद्या अपि स्वप्रकाशिकानां वृत्तीनां विलये सति अज्ञानान्धतमसावृताः सत्यो न कदाप्यभिव्यक्तिं प्राप्नुयुः। तस्मादपेक्षितसमये तासामभिव्यक्तये नियमेनापेक्ष्यत एव वर्णलिपिप्रकाशः। तथा च निखिलविद्याभासां निधेर्वेदभास्करस्योदयो नहि वर्णलिप्युदयं विना सम्भवतीति निपुणमवधातव्यम्।

अत्र विषये शर्मण्यदेशीयो भट्टमोक्षमूलराभिधः पण्डितो यः सायनाचार्यप्रणीतमृग्वेदभाष्यं संशोध्य मुद्रयित्वा च यूरोपखण्डे प्रसिद्धिमनयत् स प्रत्यवतिष्ठते। तद्यथा—भरतखण्डवासिनामार्यजनानां वर्णलिपिपरिचयो वेदकालमारभ्य सूत्रकालपर्यन्तं न बभूव। पुरातनैरार्यजनैर्हि शब्दकदम्बरूपो वेदराशिर्गुरुपरम्परया यथाश्रुतमधीयमानः श्रवणेन्द्रियविषयतयैवानुबभूवे। अत एवास्य श्रुतिरिति नामधेयं तैः प्रख्यापितम्। लिपिसद्भावे तु पुस्तकरूपेण दर्शनविषयताऽपि वेदस्य सम्भाव्यते। ततश्च 'श्रुति'संज्ञा निरालम्बा स्यात्। किञ्च येषां जनानां वर्णलिपिपरिचयो भवेत्तत्कृतनिबन्धेषु लिपिसूचकपदघटितो वाक्यप्रयोगोऽकल्पितोऽपि यथाकथंचित्प्रसङ्गवशादुपजायेतैव। यत एवंविधः कोपि सामर्थ्यविशेषो लिपिकलायामस्तीति संप्रतीतम्। वेदनिबन्धेषु तु 'गायन्ति', 'अवोचाम', 'अधीते', 'अनुब्रूयात्' इत्येवं वाक्यप्रयोगा वाग्व्यापारसूचका उपलभ्यन्ते; न तु लेखनपद्धत्यनुमापका 'लिखति','वाचयति', 'अक्षराणि', 'वर्णाः','पत्रं','लेखनी' इत्येवमादयः। एवमेव पाणिनिसूत्रपाठपर्यन्तेषु ग्रन्थेषु क्वापि लेखनपद्धत्यनुमापकपदप्रयोगाभावाद्वेदकालमारभ्य सूत्रकालपर्यन्तं वर्णलिपिर्नोदीयायेति।

अत्र ब्रूमः—यदि वेदानां 'श्रुति'रित्याकारकं नामधेयमुक्त्वा वेदकाले वर्णलिप्यभावमनुमापयेत्, तदा मन्वादिप्रणीतग्रन्थानां स्मृतिरित्याकारकनामधेयतोऽपि स्मृतिकाले तथाविधानुमानमापद्येत। उभयोर्नामधेयपदयोः समानतात्पर्येण प्रयुज्यमानत्वात्। तथाहि—पूर्वपूर्वमहर्षिभ्यः श्रुता ये ये मन्त्रसूक्तादयो वेदविभागास्ते सर्वे उत्तरोत्तरैः ऋषिभिः संगृह्य तत्तद्वेदसंहितारूपेणोपनिबद्धा इति स्वकारणीभूतश्रुतिवाचकपदेन कार्यभूतानां तत्तद्वेदनिबन्धानामपि यथा व्यवहारस्तथैव नानावेदशाखासूपादिष्टान् विविधधर्म्मान् स्मारं स्मारं मन्वादिभिः प्रणीतानां तत्तद्धर्मसंहिताग्रन्थानां स्वकारणीभूतस्मृतिवाचकपदेन व्यवहारः समजनीति। न च स्मृतिकालेऽपि वर्णलिपिर्नासीदिति वाच्यम्। स्मृतिग्रन्थेषु लेख्यप्रकरणस्यो-

पन्यासात्। यत्तु लिखति वाचयतीत्यादिप्रयोगाणां वेदेष्वनुपलम्भात्तत्काले लिप्यभावानुमानामित्युक्तम्, तन्न विचारसहम्। वेदानां यज्ञादिधर्मावबोधनार्थं प्रवृत्तत्वेन यज्ञियद्रव्यदेवतागुणस्तवनादेरेव वर्ण्यतया लिखतीत्यादिप्रयोगाणां तत्रानुपयुक्तत्वात्। नहि याज्ञे कर्म्मणि पुस्तकलेखनादिकमुपयुज्यते। प्रत्युत पुस्तकसहायतया सूक्तमन्त्रपाठादिकं याज्ञे कर्म्मणि वैगुण्यापादकमेव। यतो वाचनार्थमवश्यापेक्षणीयेन पुस्तकेन सह मनश्चक्षुषोः सन्निकर्षे जायमाने चक्षुरिन्द्रियद्वारा बहिःप्रवणाया मनोवृत्तेर्मन्त्रप्रतिपाद्यदेवतायामेकतानता भज्येत। अत एव केवलवागिन्द्रियसहायतयैव यज्ञकर्म्माणि सूक्तमन्त्रजपादिसम्प्रदायो मूलत एव प्रववृते। तथा संप्रत्यपि याज्ञिकधुरीणाः कर्म्मकाले पुस्तकं नावलोकयन्ति। अथ वेदगतैरध्यायते इत्यादिपदप्रयोगैरध्ययनादि प्रतीयते, तच्च केवलं मुखपाठक्रमेणैव न पुस्तकसहायतयेति नियमो न वक्तुं शक्यते। महतः शब्दवारिधेर्वेदराशेरध्ययनाध्यापनयोर्वाङ्मात्रेण सम्भावयितुमशक्यत्वेनोक्तनियमस्य कल्पयितुमशक्यत्वात्। किञ्च।

उत त्वः पश्यन् न ददर्श वाचमुत त्वः शृण्वन् न शृणोत्येनाम्
उतो त्वस्मै तन्वं वि सस्रे जायेव पत्य उशती सुवासा। (ऋ० १०।७१।४)।

इति ऋग्वेदे दशममण्डले श्रूयते। इयमृक् पूर्वार्द्धेनाविद्वांसम्, उत्तरार्द्धेन तु विद्वांसमाचष्टे। अत्र प्रयुक्तस्त्वशब्दः सर्वादिगणे पठितोऽन्यपर्यायः। उतशब्दस्तु अपिशब्दार्थकमव्ययम्। तथा च त्वो नाम काश्चिदन्यः पुमान् वाचं पश्यन्नपि न पश्यति। अविदुषा पुस्तकरूपेण दृष्टाऽपि वागदृष्टैव। वाचनाभावादिति भावः। एतेन वेदकाले लिपिसद्भावोऽवगम्यते। अन्यथा वाचश्चाक्षुषविषयत्वाभावेन दृशिकर्म्मत्वानुपपत्तेः। तथा त्वोऽन्यः पुमान् एनां वाचं शृण्वन्नपि न शृणोति। परेण वाचिता सती श्रुताप्यश्रुतकल्पैव। अर्थज्ञानाभावादिति तात्पर्यम्। त्वस्मै अन्यस्मै विदुषे तन्वं निजमूर्त्तिं शब्दार्थोभयात्मिकां विसस्रे समर्पयति। वागिति शेषः। तत्र दृष्टान्तमाह। पत्ये सुवासाः शोभनवस्त्रादिभूषिता उशती कामयमाना जायेवेति श्रुत्यर्थः।

यदप्युच्यते—कतिपयानां वेदशाखानामुच्छेदो विद्यमानासु शाखासु तत्र तत्र पाठभेदो वर्णलिप्यभावमूलक एव। लिपिसद्भावे तु लिखितपुस्तकानामाश्रयेण सर्वासां शाखानां समान-

पाठस्य चावस्थानं सम्भवेदिति । तदपि निःसारम् । स्मृतिकालमारभ्यैतत्कालपर्यन्तं लेखनपद्धतेर्निःसन्देहमाबाल्यधानुवृत्तिमत्त्वेऽपि बहूनां स्मृतिपुराणकाव्यादिग्रन्थानामुच्छृङ्खलदर्शनात् । प्रचरत्सु ग्रन्थेषु संवादार्थं तत्र तत्रोपन्यस्तैस्तत्तन्नामभिरेव तेषां ग्रन्थानां भूतत्वावगमात् । सम्प्रति विद्यमानग्रन्थेष्वपि नानाविधपाठदर्शनाच्च । अत्रोदाहरणमाबालप्रसिद्धं प्रदर्श्यते । यथा रघुवंशकाव्यस्य द्वितीयसर्गे 'विस्मापयन्विस्मितमात्मवृत्तौ भूपालसिंहं निजगाद सिंहः' (रघु० २ । ३३) इति पद्ये विस्मायय्यमित्येव पाठ इति केचित्, विस्मापयमित्येव पाठ इत्यन्ये वदन्ति । स्पष्टं चेदं सिद्धान्तकौमुद्या उत्तरार्द्धे 'भीस्म्योर्हेतुभये' (अष्टा० १ । ३ । ६८) इति सूत्रव्याख्याने । यथा वा तत्र काव्ये चतुर्थसर्गे 'इक्षुच्छायानिषादिन्यः शालिगोप्यो जगुर्यशः' (रघु० ४ । २०) इति पाठः । 'इक्षुच्छायानिषादिन्य' इति पाठे त्वाद्यन्तरेषो बोध्य इति वदन्ति । स्पष्टं चेदं सिद्धान्तकौमुद्याः पूर्वार्द्धे 'छाया बाहुल्ये' (अष्टा० २ । ४ । २२) इति सूत्रव्याख्याने ।

अथाऽक्षरावसानवाचकोऽक्षरशब्दोऽपि वेदे प्रयुज्यमान उदाहियते । यथा ऐतरेयब्राह्मणस्य प्रथमपञ्चिकायां द्वितीये (?) खण्डे 'तदाहुर्यदेकादशकपालः पुरोडाशो द्वावग्नाविष्णू कैनयोस्तत्र कल्पतिः का विभक्तिरिति । अष्टकपाल आग्नेयोऽष्टाक्षरा वै गायत्री. गायत्रमग्नेश्छन्दस्त्रहींदं विष्णुर्विचक्रमत सैनयोस्तत्र कल्पतिः सा विभक्तिः' (ऐ० ब्रा० १ । १) इति पठ्यते । अत्र 'अष्टाक्षरा गायत्री' इति गायत्र्याः पादमाश्रित्योक्तम् । त्रिपदायाः सकलगायत्र्यास्तु चतुर्विंशत्यक्षराणि भवन्तीति ध्येयम् । तथाऽस्मिंश्च ब्राह्मणे प्रथमाध्यायस्य पञ्चमखण्डे—'अनुष्टुभौ स्वर्गकामः कुर्यात द्वयोर्वा अनुष्टुभोश्चतुःषष्टिरक्षराणि' (ऐ० ब्रा० १ । ५) इति

१ दीक्षणीयेष्टौ प्रधानदेवते अग्नाविष्णू एकादशकपालपुरोडाशान् यजतीत्युक्तम् । तत्र शङ्कते—द्वयोर्देवतयोरेकः पुरोडाश एकादशसु कपालेषु संस्कृतो विधीयते । तत्र कपालेष्वनयोः का वण्टशिः कीदृशी कल्पना का च विभक्तिः कथं वा विभाग इति । समाधत्ते—अष्टकपाल आग्नेय इत्यादिना । अग्नेर्दशाक्षरपुरोडाशस्याष्टकपालत्वे हेतुमाह—अष्टाक्षरा गायत्रीत्यादिना । वैष्णवपुरोडाशस्य त्रिकपालत्वे हेतुमाह—त्रिर्हीत्यादिना । इदं विश्वमित्यर्थः । स्पष्टमन्यत् ।

२ मुद्रितपुस्तकेषु तु एतत्सन्दर्भगतानाम् 'अष्टकपाल', 'त्रिर्हीदं', 'विचक्रमत' इत्येतेषां स्थाने यथाक्रमम् 'अष्टाकपाल', 'त्रिकपालो वैष्णवश्चिर्हीदं,' 'व्यक्रमत' इत्येवं पाठः (मं०दे०भा०) ।

श्रूयते । तथा शुक्लयजुर्वेदस्य त्रयोविंशाध्यायेऽश्वमेधप्रकरणे 'कत्यस्य विष्ठाः कत्यक्षराणि' (वा० सं० २३ । ५७) इत्यादिः प्रश्नमन्त्रः, 'षडस्य विष्ठाः शतमक्षराणि' (वा० सं० २३ । ५८) इत्युत्तरमन्त्रश्चेति मन्त्रद्वयं श्रूयते । तत्रोत्तरमन्त्रस्यायमर्थः—अस्य यज्ञस्य विष्ठा अन्नानि षट् मधुराम्लादिषड्रसरूपाणीत्यर्थः। अक्षराणि व्यञ्जनसहिताज्रूपाणि शतसंख्याकानीति । ननु मन्त्रसमूहसाध्यस्य यज्ञस्य कथं शतमक्षराणि भवेयुरिति चेदत्र भाष्यानुसारि समाधानमुच्यते । याज्ञे कर्मणि विनियुज्यमानानां गायत्र्यादिच्छन्दसां मध्ये प्रथमान्तिमयोर्द्वितीयोपान्त्ययोस्तृतीयोपान्त्यसमीपयोरित्येवंरूपेण युग्मभावापन्नयोर्द्वयोर्द्वयोर्मन्त्रयोर्यज्ञेषु विनियोगादेकैकस्य युग्मस्य शतमक्षराणि भवन्तीति तात्पर्येण 'शतमक्षराणी' त्युक्तम् । तथाहि—गायत्र्या अक्षराणि चतुर्विंशतिः (२४), अतिधृतेः षट्सप्ततिः (७६), संकलनयाऽक्षराणि शतम् (१००)। एवमुष्णिहः २८, धृतेः ७२। अनुष्टुभः ३२, अत्यष्टेः ६८ । बृहत्याः ३६, अष्टेः ६४ । पङ्क्तेः ४०, अतिशक्वर्याः ६० । त्रिष्टुभः ४४, शक्वर्याः ५६ । जगत्याः ४८, अतिजगत्याः ५२ । इति वेदितव्यमिति ।

तथा ऐतरेयब्राह्मणस्य प्रथमपञ्चिकाया एकविंशे खण्डे 'इत्येतैरेवैनं तत्कामैः समर्धयतीति नु पूर्वं पटलम्' इति स्थितम् । अत्र वाक्ये ग्रन्थावयववाची पटलशब्दः प्रयुज्यमानः श्रूयते । ततश्च तस्मिन् काले भूर्जपत्रादौ लेखनसंप्रदाय आसीदिति गम्यते । एवं शतपथब्राह्मणस्याष्टमे काण्डे चयनप्रकरणे छन्दस्यासंज्ञकेष्टकानामुपधानं श्रूयते 'अथ छन्दस्या उपदधाती' त्यादिना । तत्र च 'छादनाच्छन्द' इति छन्दःशब्दस्य व्युत्पत्तिरपि दर्शिता । ततोऽप्यवगम्यते छादनशीलेषु वृक्षादीनां त्वक्पत्रादिषु तदानीन्तनो लेखनसम्प्रदाय इति । ऋग्वेदेऽपि छन्दःशब्दो बहुशः प्रयुज्यमानोऽस्ति। किञ्च शुक्लयजुर्वेदस्य पञ्चदशेऽध्याये 'एवश्छन्दो वरिवश्छन्दः' (वा० सं० १५ । ४) इत्यादिमन्त्रः श्रूयते। तत्र क्षुरभ्रजश्छन्द इति पदं पठितमस्ति। स चायं मन्त्रो विराट्स्वरूपभावनातात्पर्येण 'एवश्छन्दो भूलोको, वरिवश्छन्दोऽन्तरिक्षलोक' इत्यादिप्रकारेण शतपथब्राह्मणस्याष्टमे काण्डे चयनप्रकरणे व्याख्यातः। मन्त्रोक्तानां छन्दोनाम्नां प्रसिद्धार्थास्तु स्पष्टत्वान्न प्रदर्शिताः । तत्र क्षुरभ्रजशब्दस्य 'क्षुरेण लेखसाधनेन भ्राजते दीप्यते प्रकाशते' इतिव्युत्पत्तिसिद्धोऽर्थो लोकप्रसिद्ध एव । 'क्षुर विलेखने' इत्यस्माद्धातोः क्षुरशब्दस्य 'भ्राजदीप्ता' वित्य-

स्माच्च अजशब्दस्य निष्पन्नत्वात्। एवं चाक्षरघटितच्छन्दसां क्षुरशलाका प्रकाशिका। ततश्चाक्षरलिपेस्तदानीन्तनं साधनं क्षुरशला केत्यवगम्यते। किञ्च शतपथब्राह्मणस्य दशमे काण्डे 'अथ सर्वाणि भूतानि प्रैक्षत् स त्रय्यामेव विद्यायाम्' (श० ब्रा० १०।४।२) इत्यादिना वेदत्रयस्य संवत्सरप्रजापतिना साम्यं प्रतिपादयितुमष्टशताधिकदशसहस्रसङ्ख्याकानि (१०८००) संवत्सरस्य मुहूर्त्तानि, तावन्त्येव च वेदत्रयस्य पङ्क्तियुग्मानीत्यभिधाय 'संवत्सरस्य सूक्ष्मोऽवयवो यथा मुहूर्त्तस्तथा त्रय्या विद्याया अपि सूक्ष्मोऽवयवः पङ्क्तियुग्मम्' इत्युपसंहृतम्। तदित्थमुपपद्यते—एकस्याहोरात्रस्य त्रिंशन्मुहूर्त्तानि संवत्सरादिनसंख्यया (३६०) गुणितानि चेत्, प्रोक्तसंख्याकानि (१०८००) भवन्ति। तथा वेदत्रयस्यापि अशीत्यक्षरप्रमाणकानि पङ्क्तियुग्मानि संवत्सरमुहूर्त्तसंख्यातुल्यसंख्याकानि भवन्तीति भवति त्रयीविद्यायाः संवत्सरप्रजापतिना साम्यमिति। इयं हि कल्पना लिखितपुस्तकमनाश्रित्य न संभवत्येव। वेदत्रयस्य यावतामक्षराणां पङ्क्तिच्छन्दःस्वरूपं चत्वारिंशदक्षरप्रमाणलक्षणं परिकल्प्य पङ्क्तियुग्ममानेन संख्योन्नयनस्य वाग्व्यापारमात्रेण कर्त्तमशक्यत्वात्। पुस्तकसहायेनैव ग्रन्थानां श्लोकसंख्यानियमकरणस्य सर्वविद्धदनुभवासिद्धत्वाच्च॥

अथ गणितविद्योत्पत्तिविचारः।

अथात्र प्रसङ्गवशाद् गणितविद्याया वा वर्णलिपेर्वा प्रथमं प्रादुर्भाव इति चिन्त्यते। तत्राज्ञानां शिशूनां लिपिज्ञानात्पूर्वं गणितविद्यानुभवो न भवति। गणितप्रक्रियाया गहनत्वात्। वर्णलिपिर्या ब्राह्मणादिपरिगृहीता, सा त्वतीव सुगमत्वाद्भवति गणितविद्याव्युत्पत्तेः पूर्वमेवानुभवयोग्या। न च वैदिकी भाषा गणितविद्यापरिचयं न सूचयतीति वाच्यम्। वेदेषु बहूनां तत्परिचायकवाक्यानां विद्यमानत्वात्। तथा च शुक्लयजुर्वेदस्य सप्तदशेऽध्याये 'एका च दश च दश च शतं च शतं च सहस्रं च सहस्रं चायुतं चायुतं च नियुतं च नियुतं च प्रयुतं चार्बुदं च न्यर्बुदं च समुद्रश्च मध्यं चान्तश्च परार्द्धश्च' (वा० सं० १७।२) इत्येवं सङ्ख्यापदानि श्रूयन्ते, तानि च गणितविद्यापरिचायकान्येव। ऋग्वेदे ४ अष्टके २ अध्यायस्य १२ वर्गे [illegible]डलस्य राहुच्छायया वेध उपवर्णितः। तत्रेयमृक्।

यं वै सूर्यं स्वर्भानुस्तमसाविध्यदासुरः।

---

१ तीक्ष्णाग्रा लोहमयी शलाका लेखनीति यावत्।

अत्रयस्तमन्वविन्दन् नह्यन्ये अशक्नुवन् (ऋ० ५।४०।९) इति ।

आसुरोऽसुरकुलजः स्वर्भानू राहुर्यं सूर्यं तमसा निजच्छायया अविध्यत् विद्धमकरोत् तं तथाविधं सूर्यम् अत्रयोऽत्रिगोत्रजा ऋषयोऽन्वविन्दन् प्राप्तवन्तः । सूर्यमण्डलवेधविषयकं तत्त्वज्ञानं प्राप्तवन्त इत्यर्थः । ननु अन्यजनसाधारण्येनात्रयोऽपि दृष्टवन्तश्चेत्किमित्येते नामग्राहिकया प्रशस्यन्ते इत्याङ्क्षायामाह—न ह्यित्यादि । अन्ये जना नहि अशक्नुवन् । याथातथ्येनावगन्तुं शक्ता नाभूवन्नित्यर्थः । एतदपि मन्त्रलिङ्गं गणितविद्यापरिचायकमेव यथार्थग्रहणज्ञानस्य गणितसाध्यत्वात् । तथा समनन्तरोदाहृतेन संवत्सरमुहूर्त्तगणनापरेण शतपथब्राह्मणेनापि वेदकाले गणितविद्यायाः सत्त्वमनुमीयते । किञ्च वेदानां यज्ञार्थं प्रवृत्तत्वात् दर्शपूर्णमासेष्टिचातुर्मास्यादीनां यज्ञानां च नियतकालेष्वेवानुष्ठेयत्वात्, कालज्ञानस्य च सूर्यादिग्रहगतिज्ञानैकसाध्यत्वात्तत्साधनभूतगणितविद्यायास्तदानीं सम्भवोऽवश्यमङ्गीकर्त्तव्यः ।

अथ यस्यां रात्रौ प्रथमक्षणमारभ्य चरमक्षणपर्यन्तं सर्वथा चन्द्रस्यादर्शनेनामावास्यायाः, षोडशकलापूर्णस्य चन्द्रस्य दर्शनेन पौर्णमास्या ज्ञानं, तथाऽऽपूर्यमाणाभिश्चन्द्रस्य कलाभिः शुक्लपक्षीयप्रतिपदादितिथीनाम्, अपक्षीयमाणाभिश्च कृष्णपक्षीयतत्तत्तिथीनां ज्ञानम् । तथा दक्षिणोत्तरवीथ्योः सूर्यस्य परिवर्त्तनेन दक्षिणायनोत्तरायणयोः, शीतातपवृष्टीनामनुभवतारतम्येन च हेमन्तशिशिरादिऋतूनां विज्ञानं भवेदेव तत्किमर्थं गणितविद्यापक्षपात इति चेत्सत्यम् । प्रोक्तविज्ञानानां यथाकथंचित्सम्भवकल्पनेऽपि सिद्धान्तरूपेण ग्रन्थमध्ये निवेशनीयस्य कालनिर्णयस्य गणितविद्यासहायतां विनोक्तिसम्भवाभावात् । केवलं चन्द्रदर्शनेन मासनिर्णयं कुर्वतामनार्याणां द्वादशापि मासाः कालेन स्वं स्वमृतुसमयमतिक्रामन्ति । आर्यजनैराद्दताश्चैत्रादिमासास्तु न कदापि स्वकीयमृतुकालमतिवर्त्तन्ते । न च व्यवस्थितमासनिर्णयोऽर्वाचीन इति वाच्यम् । वेदेऽपि तदुल्लेखदर्शनात् । तथा हि कृष्णयजुःसंहितायाः प्रथमकाण्डे चतुर्थप्रपाठके (चतुर्दशेऽनुवाके) सोमयागप्रकरणे चतुर्दशभिः सोमग्रहैर्मासाभिमानिन्यो देवता मधुर्माधवः शुक्रः शुचिर्नभा नभस्य इष ऊर्जः सहाः सहस्यस्तपास्तपस्यश्चेति द्वादशमासनामभिर्यजनीयत्वेनाभिहिताः । तत्र द्वादशानां मासानामेकैकः सोमग्रहो मलमासस्य त्वधिकत्वमयभेदेन द्विरूपत्वात् द्वौ सोमग्रहावित्येवं चतुर्दश सोमग्रहाः सम्पद्यन्ते । एवमेव शुक्लय-

ऋग्वेदेऽपि द्वाविंशेऽध्याये स्थितम् ।

यस्मिन्मासे न सङ्क्रान्तिः सङ्क्रान्तिद्वयमेव वा ।
मलमासः स विज्ञेयो मासः स्यात्तु त्रयोदशः ॥

इति काठकगृह्ये मलमासस्य द्विरूपता स्फुटीकृता । तत्र-असङ्क्रान्तिमासोऽधिकमासः, द्विसङ्क्रान्तिमासस्तु क्षयमास इत्याख्यायते । उभयोरपि मलरूपत्वेनैकत्वादयमुभयविधोऽपि त्रयोदशो मास इत्युक्तं गृह्यकारैः । तथा ऋग्वेदेऽपि प्रथमाष्टकस्य द्वितीयेऽध्याये ।

वेद[1] मासो धृतव्रतो द्वादश प्रजावतः ।
वेदा य उपजायते ॥ (ऋ० १ । २५ । ८)

इति श्रूयते । तस्मादेवंविधकालसिद्धान्तनिर्णयगर्भाः श्रुतयो गणितविद्यापरिचयमावेदयन्ति ।

वर्णलिपिं शोधयता मया समासादिता गणितविद्या ।
निध्यै[2]यज्ञनौषधेरिह मूलं खनता यथैव निधिः ॥

येषां जनानां सर्वथा वर्णलिपिपरिचयो नास्ति, तेषां मेधा छन्दोनिबद्धमेव निबन्धमवधारयितुं शक्नोति, न तु वीतच्छन्दस्कान् वाक्यग्रथितमहानिबन्धानिति हि नियमः । वेदास्तु प्रायेण ऋङ्मन्त्रभागेतरे सर्वेऽपि मन्त्रब्राह्मणात्मका निगदरूपा एव सन्ति । तत्कथं ते वर्णलिपिमजानद्भिः पुराणैर्विप्रैरवधृता भवेयुरिति विभाव्यताम् ।

यत्तु तेनैव शर्मण्यदेशीयपण्डितेनोच्यते 'पाणिनिव्याकरणोत्पत्तिपर्यन्तमार्यदेशे वर्णलिपिर्नासीत्' इति । तद्भ्रमसात् । पाणिनिसूत्रपाठस्य तृतीयेऽध्याये 'दिवाविभानिशाप्रभाभास्कारान्तानन्तादिबहुनान्दीकिंलिपिलिबि० (अष्टा० ३ । २ । २१) इत्यादिसूत्रे दिवाकरादिशब्दवल्लिपिकरशब्दस्य साधुत्वबोधनाय पठिते साक्षादेव लिपिशब्दप्रयोगात् । वर्णलिपिं विना व्याकरणोद्भवस्यैवासम्भावनीयत्वाच्च । न हि मृत्पिण्डेन घटा इव व्याकरणेनापूर्वाः शब्दा उत्पाद्यन्ते किन्तु सिद्धानामेव शब्दानां साधुत्वमन्वाख्यायते इति स्पष्टं पतञ्-

---

१ धृतव्रतो वरुणदेवः प्रजावतः कालस्य सर्वाधारत्वात् प्रजाः सन्ति एषु तान् द्वादश मधुमाधवादिभिश्चैत्रवैशाखादिभिर्वा नामभिः प्रसिद्धान् मासः मासान् वेद जानाति । तथा उपजायते द्वादशमासानामन्यतमस्य कस्यचित् उप समीपे यो मलमासो जायते प्रादुर्भवति । वेद जानाति । तमपीति शेषः । कर्माध्याहारमन्तरेणाकाङ्क्षाशान्तेरभावात् ।

२ येनाक्तेन भूमिष्ठो गुप्तोऽपि धनकुम्भश्चाक्षुषविषयो भवति तन्निध्यञ्जनम् ।

लिकृते व्याकरणमहाभाष्ये पस्पशाह्निके। तथा च बहुषु प्राचीनग्रन्थेषु परस्परविलक्षणान् बहुविधशब्दप्रयोगान् पर्यालोच्यापरेषां ग्रन्थकाराणां तत्तच्छब्दप्रयोगविषये विप्रतिपत्तयः कियन्तं कालमुपजायन्ते। ततश्चानियमनिवृत्तये शब्दानुशासनरचनायां विद्वांसः प्रवर्त्तन्ते इत्यवगन्तुं शक्यते। शब्दानुशासनकृतो बहव आचार्याः पाणिनेः पूर्वं बभूवुरिति 'लङः शाकटायनस्यैव' (अष्टा० ३।४।१११), अवङ् स्फोटायनस्य' (अष्टा० ६।१।१२३), 'वा सुप्यापिशलेः' (अष्टा० ६।१।९२), 'सर्वत्र शाकल्यस्य' (अष्टा० ८।४।५१) इत्यादिभिरष्टाध्यायीस्थसूत्रैरवगम्यते। सर्वेषां व्याकरणकृतामिन्द्रः प्रथमो बभूव।

इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः।
पाणिन्यमरजैनेन्द्रा जयन्त्यष्टादिशाब्दिकाः॥

इति बोपदेवकृते कविकल्पद्रुमाख्यधातुपाठे पूर्वाचार्याणां जयवादेन प्रशंसने इन्द्रस्य प्राथम्येनोपन्यासात्। तथा च कृष्णयजुर्वेदस्य षष्ठे काण्डे चतुर्थप्रपाठकस्य नवमानुवाके[1] श्रूयते 'वाग्[2]वै पराच्यव्याकृता अवदत्। ते देवा[3] अब्रुवन्निमां नो वाचं व्याकुर्विति। सोऽब्रवीदिन्द्रं वृणै मह्यं चैषं[4] वायवे च सह गृह्याता इति। तस्मादैन्द्रवायवश्च[5] सह गृह्यते। तामिन्द्रो मध्यतोऽवक्रम्य व्याकरोत्तस्मादियं व्याकृता वागुद्यते' इति। एवं च वेदकालेऽपि व्याकरणप्रवृत्तिख्यापिकेयं श्रुतिस्तदानीमपि लिपिसद्भावमवगमयतीत्यलं पल्लवितेन॥

अथात्र संसारे शुभाशुभस्वकर्मपरिपाकवशादुच्चावचयोनिषु संसरन्तः सर्वेऽपि प्राणिनः स्वभावत एव दुःखविद्वेषिणः सुखानुरागिणश्च दृश्यन्ते। तान् प्रति सुखादिप्राप्तिसाधनमुपदिश्यते ऋग्वेदे।

हविर्भिरेके[5] स्वरितः सचन्ते सुन्वन्त एके सवनेषु सोमान्।

---

१ सप्तमानुवाके; सत्यव्रतसामश्रमिणा संपादितपुस्तकानुसारेण। [मं० दे० शा०]

२ पराची पुरातनी वाक् वेदरूपिणी अव्याकृता मेघस्तनितवदखण्डाकारा अविदितपदवाक्यप्रभेदेति यावत्। तामिन्द्रो मध्यतोऽवक्रम्य विच्छिद्य एतावदिदं वाक्यम्, वाक्ये चैतानि पदानि, पदेषु चैताः प्रकृतयः, एते प्रत्यया, इत्येवमवक्रमणम् अखण्डाया वाचो विभेदनं कृत्वेत्यादिरर्थः।

३ देवा इन्द्रमिति पाठः सत्यव्रतसामश्रमिणा संपादितपुस्तके। [मं० दे० शा०]

४ चैवैष इति पाठः सामश्रमिणा संपादिते सभाष्ये पुस्तके। [मं० दे० शा०]

५ एके सत्पुरुषा हविर्भिः विधिनाहुतैश्चरुपुरोडाशादिभिः साधनभूतैरित्यो-

शचीर्मदन्त उत दक्षिणाभिर्नेजिह्मायन्त्यो नरकं पताम ॥
(नि० १ । ११) इति ।

अन्यत्रापि श्रूयते 'तरति शोकमात्मवित्' (छा० उ० ७ । १ । ३) इति, 'आनन्दं ब्रह्मणो विद्वान्न बिभेति कुतश्चन' (तै० उ० २।९।१) इति च । एवं च वेदप्रदर्शिते कर्ममार्गे ज्ञानमार्गे वा प्रस्थितानां मनुजानां दुःखासम्भिन्नः स्वर्गो वाऽपवर्गो वा भवतीति श्रुतिरहस्यम् ।

स्यादेतत्—सुखलाभाय प्रयतमाना अपि बहवो जना दुर्दैववशाद् दुःखैरेव युज्यन्ते । तथा सुखनिःस्पृहा अयत्नवन्तोऽपि केचिद्भाग्यवशान्नरेन्द्रस्पृहणीयैः सुखैरेव युज्यन्ते । तस्माद्दैवायत्तमेव सुखं वा दुःखं वा प्राणिभिर्लभ्यत एव । तत्किमिति सत्कर्मसु प्रवृत्तौ पापकर्मभ्यो वा निवृत्तौ यत्न आस्थेयः । नहि सदसत्कर्मणोर्यथासंख्येन सुखदुःखहेतुता निश्चेतुं शक्यते । बहुशो व्यभिचारदर्शनादिति चेत् । मैवम् । पुरुषप्रयत्नस्य सर्वार्थसाधकत्वात् । व्यभिचारदर्शनस्य यथायोग्यसाधनसम्पत्तिवैकल्यप्रयुक्तत्वेनादोषत्वात् । येषां सत्कर्मकृतां यत्नवतामपि दुःखमापतति, तेषां जन्मान्तरीयं प्रचुरदुष्कृतमिह फलितम् । येषां त्वयत्नवतां सुखनिःस्पृहाणामप्यनुत्तमं सुखं समापतति, तेषां तु जन्मान्तरीयं प्रचुरसुकृतमिह फलितम् । तथा च प्रचुरदुरितक्षयाय प्रचुरसुकृतस्यैव कारणत्वान्न व्यभिचारः । तथा चोक्तं भाषापरिच्छेदे—

सुखं तु जगतामेव काम्यं धर्मेण जन्यते ।
अधर्मजन्यं दुःखं स्यात्प्रतिकूलं तु चेतसाम् ॥ इति ।

योगवासिष्ठेऽप्युक्तं रामभद्रं प्रति वसिष्ठेन—

सर्वमेवेह हि सदा संसारे रघुनन्दन ।
सम्यक्प्रयत्नात्सर्वेण पौरुषात्समवाप्यते ॥

ऽस्माल्लोकात्स्वः स्वर्गं लोकं सचन्ते गच्छन्ति । एके सवनेषु प्रातःसवनादिषु अग्निष्टोमादिष्विति यावत् । सोमान् सुन्वन्तः सोमाभिषवं कुर्वन्तः सन्तः स्वर्गं गच्छन्ति । उत अपि दक्षिणाभिः शचीः क्रतून् मदन्तो हर्षेण कुर्वन्तः स्वर्गं गच्छन्ति । जिह्मायन्त्यः पापमाचरन्त्यः प्रजा नरकं पताम पतन्तीत्यर्थः । व्यत्ययो बहुलमिति पुरुषव्यत्ययः । नेदिति निपातसंघातः पादपूरणार्थः । यद्वा इदिति पादपूरणार्थकं नेत्युपमार्थकमव्ययम् । एवं च यथा जिह्मायन्त्यो नरकं पतन्ति तथा एके हविर्भिर्यज्ञसाधनैः स्वर्गं गच्छन्ति इत्यादिरीत्या व्याख्येयम् । "नरकं न्यरकं नीचैर्गमनं नास्त्रिमणं स्थानमल्पमप्यस्ति" इतिनरकशब्दार्थ एतन्मन्त्रव्याख्याने निरुक्तग्रन्थे प्रथमाध्यायस्यैकादशे खण्ड उक्तो यास्कमुनिना ।

उच्छास्त्रं शास्त्रितं चेति पौरुषं द्विविधं स्मृतम् ।
तत्रोच्छास्त्रमनर्थाय परमार्थाय शास्त्रितम् ॥ इति ।

अवश्यमिदमकामेनापि भाग्यशरणेनाभ्युपगन्तव्यम् । अन्यथा कृषिवाणिज्यादिलौकिकव्यापाराणां चिकित्साप्रभृतिमोक्षशास्त्रपर्यन्तोपदिष्टशास्त्रीयोद्यमानां च सर्वेषामानर्थक्यं प्रसज्येतेति दिक् ॥

———:०:———

अथात्र धर्म आर्याणां कीर्त्यतेऽस्माभिरादरात् ।
वेदादीनां प्रमाणानामुपन्यासपुरःसरम् ॥

धारणार्थकाद् धृधातोः कर्त्तर्यौणादिकमन्प्रत्ययेन व्युत्पादितो धर्मशब्दः पङ्कजादिशब्दवद्योगरूढः । तत्र पततो जनानाश्रयो भूत्वा धरतीति धर्मशब्दस्य योगार्थः । रूढ्यर्थस्त्वनिष्टाननुबन्धीष्टफलसाधनमित्याकारकः । तथा चानिष्टपरिहार इष्टफललाभश्च भवति येनानुष्ठीयमानेन स धर्म्म इत्युक्तं भवति । यद्यपि रोगाद्यनिष्टनिवृत्तिः शरीरपुष्ट्यादीष्टप्राप्तिश्च भवति भिषग्वरोपदिष्टौषधसेवनेन, तथा शत्रुभयाद्यनिष्टनिवृत्तिर्धनाद्दीष्टप्राप्तिश्च भवति भूपतिवरानुवर्त्तनादिना । तथापि नैतानुपायान् धर्मलक्षणमतिव्याप्नोति । आमुष्मिकयोरनिष्टपरिहारेष्टलाभयोर्लक्षणवाक्ये विवक्षितत्वात् । नरकयातनानिवृत्तिस्वर्गादिसुखावाप्तिरूपयोस्तयोर्धर्मैकसाध्यत्वस्य 'हविर्भिरेके स्वरितः सचन्ते' (नि० १ । ११) इत्यादिसमनन्तरोदाहृतश्रुतिसिद्धत्वाच्च । यद्यपि आमुष्मिकस्वर्गादिफलस्यातीन्द्रियत्वात्तत्सिद्धौ लौकिकोपायानामयोग्यत्वम्, तथापि सर्वज्ञपरमेश्वराज्ञावाक्यभूतवेदविहितधर्म्मः साधनं भवत्येवेति सर्वेषामृषीणां धर्मसंहिताकाराणां मन्वादीनाञ्च सम्मतम् । वेदस्य च यथा परमेश्वरप्रणीतत्वं तथाऽग्रे उपपादयिष्यामः ॥

अथ वेदो नाम वेद्यन्ते ज्ञाप्यन्ते धर्मार्थकाममोक्षा अनेनेति व्युत्पत्त्या चतुर्वर्गज्ञानसाधनभूतो ग्रन्थविशेषः । करणे घञ् बाहुलकात् । स च किंलक्षण इति चेत् 'मन्त्रब्राह्मणयोर्वेदनामधेयम्' (प्र० सू० १ । २) इति आगमोक्तं तल्लक्षणं वेदितव्यम् । यो ह्यव्यभिचरितस्वरवर्णादिपठनपाठनक्रमागतः सन्सर्वकालं सर्वदेशेषु प्रतिशाखमविभागेन वर्त्तमानः स एको मन्त्रराशिः । अपरस्तु

---

१ परस्वहरणानृतभाषणादिलक्षणम् ।

२ योग्यवृत्त्या धनार्जनसत्यभाषणादिलक्षणम् ।

विधिनिन्दाप्रशंसासम्प्रश्नाख्यानादिभिस्तस्यैव प्रायो विनियोगप्रख्यापक उपव्याख्यानभूतो वाक्यनिचयो ब्राह्मणराशिः । अनयोरेकः सङ्ग्रहो वेद इत्यभिधीयते । वेदनिबन्धेषु मन्त्रब्राह्मणभागौ परस्परमसम्मिश्रावेव प्रायः पठ्येते । क्वचित्तु ब्राह्मणसम्मिश्रितोऽपि मन्त्रभागः पठितोऽस्ति । एवमुभयात्मकोऽपि विध्यर्थवादमन्त्ररूपेण त्रिधा व्यवस्थितोऽयं वेदराशिरेकमूल एककर्मलक्षणफलो महाकल्पवृक्षो वरीवर्त्ति अस्य च फलभूतं कर्म्म विधिना विहितमर्थवादेन प्ररोचितं मन्त्रेण च स्मृतं सदभ्युदयकारि भवति । ननु प्रतिशाखं यज्ञकर्म्माणि भिद्यन्ते तत्कथमेककर्म्मफलोऽयं वेदकल्पवृक्ष इत्युच्यते । नैष दोषः । अवान्तराकृतिभेदेऽपि कर्म्मजातिव्यञ्जकप्रधानाकृतिभेदाभावात् । नह्येकस्यां शाखायां विहितस्याग्निहोत्रादिकर्म्मणः स्थाने विजातीयस्य ग्रहयज्ञादेरपरस्यां शाखायां विधानमस्ति । तस्मान्न प्रतिशाखं कर्मभेद इति मन्तव्यम् । यदि प्रतिशाखं बदरामलकादिवज्जात्यैव कर्म्मभेदः स्यात् तदा एकमूलाभावादादित एवारभ्य भिद्यमानत्वाद् वृक्षान्तरवद्भेदान्तराण्येवोच्येरन्, न शाखान्तराणि । तस्मादेकमूलः समानफलोऽयं वेदकल्पशाखीत्याहुः ॥

सर्वार्थवेदको वेदश्चतुर्द्धा भिद्यते क्रमात् ।
ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः ॥ इति ।

यद्यपि बहुषु श्रुतिस्मृत्यादिवाक्येषु वेदत्रयी संकीर्त्यते, न तु चतुर्थोऽथर्वणवेदः । तथापि ब्रह्मवेदशब्देन चतुर्थस्याथर्वणवेदस्यापि मुण्डकोपनिषदि[1] श्रवणात् स्मृतिपुराणादिष्वपि बहुशः संकीर्त्तनाच्च चतुर्द्वैत्युक्तम् । तथा चरणव्यूहेऽपि ' अथातश्चरणव्यूहं व्याख्यास्यामः । तत्र निरुक्तं चातुर्विद्यं चत्वारो वेदा विज्ञाता भवन्ति ' (च० १) इति स्थितम् । तथा व्याकरणमहाभाष्ये पतञ्जलिनाप्युक्तम् ' महान् शब्दस्य प्रयोगविषयः—सप्तद्वीपा वसुमती त्रयो लोकाश्चत्वारो वेदाः साङ्गाः सरहस्या बहुधाभिन्ना एकशतमध्वर्यु[2]शाखाः सहस्रवर्त्मा सामवेद एकविंशतिधा बाह्वृ[3]च्यं नवधाऽथ-

---

१ ' तस्मै स होवाच । द्वे विद्ये वेदितव्य इति ह स्म यद् ब्रह्मविदो वदन्ति परा चैवापरा च । तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति । अथ परा यया तदक्षरमधिगम्यते ।' (मु० उ० १ । ४–५) । [मं० दे० शा०]

२ अध्वर्युर्यजुर्वेदः ।

३ ' बाह्वृच्यम् ' पाठभेदः ।

र्वणो वेदः' (महा० पस्पशाह्नि०) इति । एवं वेदस्य चातुर्विध्यं ३ अष्टके ८ अध्याये १० वर्गे श्रूयमाणया ऋचाप्यभिधीयते ।

चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य ।
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याँ आ विवेश ॥

(ऋ० ४ । ५८ । ३) इति । अत्र निरुक्ते 'चत्वारि शृङ्गेति वेदा वा एते उक्ताः' (नि० परिशि० १३ । ७) इति यास्केनोक्तम् । वेदभाष्ये सायनाचार्येणापि तथैव भाषितमित्यलम् ॥

तत्र तावद्ऋग्वेदस्य मानमुक्तं चरणव्यूहे ।

ऋचां दश सहस्राणि ऋचां पञ्च शतानि च ।
ऋचामशीतिः पादश्च (१०५८०) तत्पारायणमुच्यते ॥

(च० १) इति ।

अस्य च वेदस्य पञ्च शाखाः सन्ति । शाकला बाष्कला आश्वलायनाः शाङ्खायना माण्डूकाश्चेति । तथा चोक्तं शौनकीये प्रातिशाख्ये[2] ।

ऋचां समूहो ऋग्वेदस्तमभ्यस्य प्रयत्नतः ।
पठितः शाकलेनादौ चतुर्भिस्तदनन्तरम् ॥
शाङ्खाश्वलायनौ चैव माण्डूको बाष्कलस्तथा ।
बह्वृचा ऋषयः सर्वे पञ्चैते एकवेदिनः ॥ इति ।

अत्र शाकलादिषु ऋषिशब्दो गौणो, न तु मुख्यः । आश्वलायनगृह्ये देवर्ष्याचार्यतर्पणविधिविधायके सूत्रे[3] शाकलादीनामृषिष्वपरिगणनादाचार्येषु गणनाच्च । एवमैतरेयि, कौषीतकि, शैशिरि, पैङ्गिल्यादयोऽन्येऽपि ऋग्वेदस्य शाखाभेदाः क्वचिदुपलभ्यन्ते । तथा विष्णुपुराणेऽप्युक्तम् ।

---

१ वर्षणात् कामपूरणाद् वृषभो यज्ञस्तस्य चत्वारि शृङ्गाणि स्वरूपव्यञ्जकतया शृङ्गस्थानीयाश्चत्वारो वेदाः । त्रीणि सवनानि त्रयः पादाः । द्वे प्रायणीयोदयनीये इष्टी शीर्षे । सप्त च्छन्दांसि हस्ता भवन्ति । त्रिधा मन्त्रब्राह्मणकल्पैर्बद्धो वृषभो रोरवीति । यदेनमृग्भिः शंसन्ति यजुर्भिर्यजन्ति सामभिः स्तुवन्तीति तदिदमस्य सवनक्रमेण रोरवणम् । महो देवो महानयं देवो यज्ञरूपोऽग्निर्मर्त्यानाविवेश यजनक्रियानिष्पत्त्यर्थं मनुष्येषु प्रविष्ट इत्यर्थो निरुक्तसंमतः ।

२ शौनिकीयऋग्वेदप्रातिशाख्यस्य मुद्रितपुस्तकेषु तु अयं पाठो नोपलभ्यते । हस्तलिखितपुस्तकेष्वप्यद्य यावन्नहि दृष्टोऽस्माभिः । [मं० दे०शा०]

३ आश्व० गृ०।३।४।४ ॥ [मं० दे० शा०]

मुद्गलो गोकुलो वात्स्यः शौशिरः शिशिरस्तथा ।
पञ्चैते शाकलाः शिष्याः शाखाभेदप्रवर्त्तकाः ॥ इति ।
तथा व्याकरणमहाभाष्ये 'एकविंशतिधा बह्वृचाः' इति स्थितम्। एवं चाध्ययनसंप्रदायप्रवर्त्तकानामेषां शाकलादीनामाचार्याणां प्रवचनभेदः शाखाभेदव्यवहारे कारणम् । ततश्च मन्त्रब्राह्मणात्मकः स्वाध्यायैकः शाखेति पर्यवसितोऽर्थः।सा च शाखा अध्ययनभेदाद्वा सूत्रभेदाद्वा भिद्यते । एकस्मिन्नेव वेदे मन्त्रब्राह्मणयोरन्यतरभेदेन योऽवान्तरशाखाभेदः, सोऽध्ययनभेदकृतः । यथा शाकलबाष्कलयोर्द्वयोः शाखयोः स्वाध्यायो यत्किंचिद्भिद्यते सूत्रं तु भिन्नाध्ययनयोर्द्वयोरप्याश्वलायनीयमेकमेव । तथा च शाकलबाष्कलयोर्भेदोऽध्ययनभेदकृतः । अथैकस्यां समानपाठायामपि तैत्तिरीयशाखायामवान्तरशाखाभेदो बौधायनापस्तम्बहिरण्यकेशिप्रभृतिसूत्रभेदकृतो वेदितव्यः।एवं प्रवचनभेदात् प्रतिवेदं भिन्ना भूयस्यः शाखाः सन्ति । प्रवचनशब्दः सूत्रप्रातिशाख्यशिक्षाद्यङ्गवाचकः । तथा च ।

अग्र्याः सर्वेषु वेदेषु सर्वप्रवचनेषु च ।
श्रोत्रियान्वयजाश्चैव विज्ञेयाः पङ्क्तिपावनाः ॥ (मनु० ३ । १८४)

इति तृतीयाध्यायगतमनुवचनव्याख्यायां कुल्लुकभट्ट आह 'प्रकर्षेणैवोच्यते वेदार्थ एभिरिति प्रवचनान्यङ्गानि' इति । एवं प्रवचनशब्देन ब्राह्मणमप्युच्यते यतस्तेनापि प्रकर्षेण वेदार्थस्य परिभाषणादित्याहुः ।

ऋग्वेदस्य सप्तदशाधिकमेकसहस्रं सूक्तानि । षडधिके द्वे सहस्रे वर्गाः । चतुःषष्टिरध्यायाः । दश मण्डलानि । अष्टौ अष्टकानि । इत्येवं विभागः परिकल्पितः । तत्र सूक्तलक्षणं यथा बृहद्देवतायाम्[1]—
'सम्पूर्णमृषिवाक्यं तु सूक्तमित्यभिधीयते' (बृ० दे० १ । १३) इति। सम्पूर्णं निराकाङ्क्षं यद्दृषेर्वेदस्य वाक्यं तत्सूक्तमिति तदर्थः । वैदिकं महावाक्यं सूक्तमिति यावत्।तच्च त्रिविधम्। ऋषिसूक्तम्,देवतासूक्तम् छन्दःसूक्तमिति भेदात् । त्रयाणामेषां लक्षणानि बृहद्देवतायां यथा—

ऋषिसूक्तानि यावन्ति सूक्तान्येकस्य वै कृतिः ।
स्तूयेतैकां तु यावत्सु तत्सूक्तं दैवतं विदुः ।
समानच्छन्दसो मन्त्राश्छन्दःसूक्तं तदुच्यते[2] ॥ (cp. बृ० दे० १ । १३–१६) इति ।

---

१ बृहद्देवतानामको ग्रन्थः शौनकेन महर्षिणा कृतः ।

२ मैक्डानेल संपादितबृहद्देवतापुस्तके त्वत्र विभिन्न एव पाठः । स च तत्रैव द्रष्टव्यः । [मं० दे० शा०]

तत्र ऋषिसूक्तं यथा—'अग्निमीळे' (ऋ० १।१।१) इत्यारभ्य 'इन्द्रं विश्वा अवीवृधन्' (ऋ० १।११।१) इत्यतः प्राग् विंशति-वर्गसमाप्त्यन्तमेकमृषिसूक्तम्। तावतीनामृचामेकेनर्षिणा मधुच्छन्दसा दृष्टत्वात्। यथा वा—'इन्द्रं विश्वा अवीवृधन्' इत्यूर्ध्वं द्वितीयमृषिसूक्तम्। तासामृचां मधुच्छन्दसः पुत्रेण जेता दृष्टत्वात्। देवतासूक्तं यथा—'अग्निमीळे पुरोहितम्' इत्यादिनवर्चमग्निदेवताकमाद्यं देवतासूक्तम्। यथा वा—'वायवा याहि दर्शत' (ऋ० १।२।१) इति नवर्चं वायव्यं द्वितीयं देवतासूक्तम्। छन्दःसूक्तं यथा—'अग्निमीळे पुरोहितम्' इत्यारभ्याष्टादशवर्गपर्यन्तं 'गायन्ति त्वा गायत्रिणः' (ऋ० १।१०।१) इत्यतः प्राग् गायत्रीछन्दोबद्धमाद्यं छन्दःसूक्तम्। एवं यथायथमुदाहर्त्तव्यम्। त्रिविधानामप्येषां सूक्तानां कर्म्मसु विनियोगः श्रुत्या प्रतिपाद्यते। तथा हि 'उदु ब्रह्माणैरत श्रवस्येति ब्राह्मणाच्छंसी[1] ब्रह्मणवत्समृचं सूक्तमहरहः शंसति' इति प्रकृत्य 'तदु वासिष्ठम्। एतेन वै वसिष्ठ इन्द्रस्य प्रियं धामोपागच्छत्' इति ऐतरेयब्राह्मणस्य पञ्चमपञ्चिकायामुक्तम्। तथा देवतासूक्तस्य विनियोगोऽप्यैतरेयब्राह्मणस्य षष्ठपञ्चिकायामुपदिश्यते[2]—'तस्मान्मैत्रावरुणं मैत्रावरुणः प्रातःसवने शंसति' (ऐ० ब्रा० ६।४) इति। मैत्रावरुणनामक ऋत्विक् मैत्रावरुणं मित्रावरुणदेवताकं सूक्तं प्रातःसवनकर्म्मणि शंसतीति तदर्थः। एवमैतरेयब्राह्मणस्य पञ्चमपञ्चिकायाम्—'तदु त्रैष्टुभं तेन प्रतिष्ठितपदेन' (ऐ० ब्रा० ५।४) इति वाक्येन त्रिष्टुप्छन्दोघटितं छन्दस्सूक्तमुपदिश्यते। वर्गविभागोऽध्यायविभागश्चाध्यापकसम्प्रदायक्रमागत एवेति भाति, यतोऽनुगतं तयोः किंचिल्लक्षणं न पश्यामः। मण्डललक्षणं तु शक्यते उन्नेतुम्—तत्तदृषिदृष्टानां बहूनां सूक्तानामेकर्षिकर्तृकः सङ्ग्रहो मण्डलमिति। अत एव सर्वानुक्रमणिकायामुक्तं शौनकेन[3]—'य आङ्गिरसः शौनहोत्रो भूत्वा भार्गवः शौनकोऽभवत्स गृत्समदो द्वितीयं मण्डलमपश्यत्' (ऋ०सर्वानु० २।१) इति,। न हि द्वितीयमण्डलगतानि सर्वाणि सूक्तानि गृत्समद एव दृष्टवान्, किंतु सङ्गृहीतवान्। अन्यथा क्रतुकूर्मादीनां तत्तत्सूक्तर्षित्वेन तत्रैवानु-

---

१ ब्राह्मणाच्छंसी ऋत्विग्विशेषः।

२ मुद्रितपुस्तकेषु तु षष्ठपञ्चिकाया विंशतितमे खण्ड एवायं पाठः समुपलभ्यते। [मं० दे० शा०]

३ शौनकशिष्यः कात्यायन एवास्य ग्रन्थस्य कर्तेति तु प्रसिद्धिः। [मं० दे० शा०]

क्रमणिकाग्रन्थेऽभिधानस्यासङ्गतेः । मण्डलर्षय आश्वलायनगृह्यसूत्रे उक्ताः—' शतर्चिनो माध्यमा गृत्समदो विश्वामित्रो वामदेवोऽत्रिर्भरद्वाजो वसिष्ठः प्रगाथाः पावमान्याः क्षुद्रसूक्ता महासूक्ताः ' (आश्व० गृ० ३।४।१) इति ।

मधुच्छन्दःप्रभृतयोऽगस्त्यन्ता आद्यमण्डले ।
ये सन्ति ऋषयस्ते वै सर्वे प्रोक्ताः शतर्चिनः ॥

शतर्चिपदस्य निर्वचनं कृतं पूर्वाचार्यैः—

ददर्शादौ मधुच्छन्दा ह्यधिकं यदृचां शतम् ।
तत्साहचर्यादन्येऽपि विज्ञेयास्तु शतर्चिनः ॥
अच्छावाश्छत्रिणैकेन यथा ते छत्रिणोऽभवन् ॥ इति ॥

ह्यधिकेऽपि शतोक्तिर्बाहुल्यात् । अन्त्ये मण्डले क्षुद्रसूक्तानां महासूक्तानां च द्रष्टार ऋषयोऽपि लक्षणया क्षुद्रसूक्ता महासूक्ता इति व्यपदिश्यन्ते । महासूक्तलक्षणं बृहद्देवतायामुक्तम्—' दशर्चताया अधिकं महासूक्तं विदुर्बुधाः ' इति । एतेन—एकर्चप्रभृतिदशर्चपर्यन्तं क्षुद्रसूक्तम्—इति क्षुद्रसूक्तलक्षणमपि सूचितं भवति । मध्यमेषु द्वितीयादिनवमान्तेषु मण्डलेषु ये ऋषयस्ते माध्यमा व्यपदिश्यन्ते। तथा च प्रथमस्य मण्डलस्य शतर्चिनो, द्वितीयस्य गृत्समदः, तृतीयस्य विश्वामित्रः, चतुर्थस्य वामदेवः, पञ्चमस्यात्रिः, षष्ठस्य भरद्वाजः, सप्तमस्य वसिष्ठः, अष्टमस्य प्रगाथाः, नवमस्य पावमान्याः, दशमस्य क्षुद्रसूक्ता महासूक्ताश्चेति गृह्यसूत्रार्थः ।

अथैषामृषीणां चातुर्विध्यमुक्तं पूर्वाचार्यैः—

ऋषीणामृषिपुत्राणामृषिकाणां स्वयंभुवाम् ।
तथा नामाभिजानीयाद्यथैषां मन्त्रदृष्टयः ॥
प्रवरैर्यैः समाख्याता ऋषयस्त इति श्रुतिः ।
तत्पुत्रपौत्रनप्तार ऋषिपुत्रा इति स्मृताः ॥
राजन्यवैश्या ऋषिकाः स्त्रियस्तास्तिर्यग्योनयः ।

---

१ क्षुद्रसूक्तलक्षणमादित्यमुक्तके तु न दृश्यत इति द्रष्टव्यम् । [मं० दे० शा०]

२ यथा यतो हेतोरेषामृष्यादीनां मन्त्रदृष्टयो वर्त्तन्ते तथा ततो हेतोरेषां ऋषिरित्येव सामान्यतो (नाम) जानीयात् ।

३ प्रवरैर्मन्त्रदर्शिभिः पुत्रपौत्रादिभिर्यैः समाख्याताः प्रसिद्धास्ते ऋषयः कथ्यन्त इति शेषः । नप्ता प्रपौत्रः ।

४ राजन्यवैश्याः । अपि च ताः स्त्रियः गोधाघोषाप्रभृतयो ब्रह्मवादिन्य इति प्रसिद्धाः ऋषिका इत्युच्यन्ते । ऋषिका इति पुंसि स्त्रियां च तन्त्रेण बहु-

भगवन्तं भास्करं तपसा प्रसाद्य वाजिरूपधरात्तस्मादलोकविदितं यजुर्वेदमधिगतवान्। सोऽयं यजुर्वेदः शुक्ल इत्यभिधीयते॥ यतोऽत्र दर्शपौर्णमासप्रभृतिसर्वयज्ञेषूपयुक्तानां यजुर्मन्त्राणां ब्राह्मणसङ्कीर्णानां यथायोग्यक्रमेण विन्यासेन याज्ञिकानां व्यामोहाजनकात्॥ प्राचीनयजुर्वेदस्य तु ब्राह्मणसङ्कीर्णत्वात् तत्तद्याज्ञियमन्त्राणामप्यनुक्रमेण पाठाभावाच्च ततो यज्ञकर्मानुष्ठानमार्गस्य दुर्ज्ञेयत्वात् कृष्णत्वमिति॥

शुक्लयजुर्वेदस्य पञ्चदश भेदाः सन्ति। काण्वा माध्यन्दिना जाबाला बुधेयाः शाफेयास्तापनीयाः कपोलाः पौण्ड्रवत्सा आवटिकाः परमावटिकाः पाराशरीया वैनेया वैधेया औधेया गालवाश्चेति। सर्व एते वाजसनेयिन इति व्यपदिश्यन्ते॥ एतद्भेदस्य मानमुक्तं चरणव्यूहे—

'द्वे सहस्रे शतन्यूने मन्त्रा वाजसनेयके।
तावन्मानेन संख्यातं वालखिल्यं सशुक्रियम्।
ब्राह्मणं तु समाख्यातं प्रोक्तमानाच्चतुर्गुणम्॥ (cp च०२) इति।

वाजसनेयिनां ब्राह्मणं शतपथसंज्ञकम्। तच्चार्वाचीनमिति भट्टोजीदीक्षितमतम्। सिद्धान्तकौमुद्यां 'पुराणप्रोक्तेषु ब्राह्मणकल्पेषु' (अष्टा० ४।३।१०५) इति सूत्रे भाल्लविनः शाट्यायनिन इत्युदाहृत्य, पुराणेति किम्। याज्ञवल्कानि ब्राह्मणानीति प्रत्युदाहृतम्। तत्स्वारस्याद्यद्यपि याज्ञवल्क्यो न पुराणो मुनिरिति प्रतीयते। तथापि 'याज्ञवल्क्यादिभ्यः प्रतिषेधस्तुल्यकालत्वात्' (वा० ४।३।१०५) इति 'तद्विषयता चेति न' (महाभाष्य ४।२।६६) इति वचनमेतत्सूत्रभाष्ये पतञ्जलिनोपन्यस्तम्। तत्स्वारस्येन याज्ञवल्क्यः पुराण एवेति लभ्यते। अन्यथा वचनारम्भो व्यर्थः स्यात्। पुराणपदेनैव तद्व्यावृत्तेः सिद्धत्वात्। याज्ञवल्क्यस्य वैशम्पायनान्तेवासित्वेन शाट्यायनादितुल्यकालभवत्वाच्च। स्पष्टं चेदमस्मैव सूत्रे शब्देन्दुशेखरे इति दिक्॥

अथ सामवेदस्य सहस्रं शाखा आसन्। तत्रानध्यायेष्वधीयाना बहवः शाखाध्यायिन इन्द्रेण शतपर्वणा निहतास्ततः प्रभृति बह्व्यः शाखा उच्छिन्नाः। कतिचे (? चि) देवावशिष्टाः प्रचरन्ति। यथा—राणायनीयाः शाट्यमुद्राः कापोला महाकापोला लाङ्गलिकाः शार्दूलाः कौथुमाश्चेति[1]। तत्र कौथुमानां षड्भेदाः सन्ति। आसु-

१ चरणव्यूहस्य द्वितीया कण्डिकात्र द्रष्टव्या। (मं० दे० शा०)

रायणा वातायना प्राञ्जलयो वैनधृताः प्राचीनयोग्या नैगेयाश्चेति। एतन्मानमुक्तं चरणव्यूहे—

'अष्टौ सामसहस्राणि सामानि च चतुर्दश।
ऊह्यानि सरहस्यानीत्येतत्सामगणः स्मृतः॥' (cf. च०३) इति

अथर्वणवेदस्य नव भेदाः भवन्ति—पैप्पलादाः शौनकीया दामोदास्तोत्तायना जायला ब्रह्मपलाशाः कुनखी देवदर्शी चारण-विद्याश्चेति। एतन्मानमुक्तं चरणव्यूहे—

'द्वादशानि सहस्राणि मन्त्राणां त्रिशतानि च।
गोपथं ब्राह्मणं वेदेऽथर्वणे शतपाठकम्[1]॥ (cf. च. ४) इति।

इदमत्र सम्प्रधार्यम्—मन्त्रब्राह्मणयोर्वेदत्वाविशेषेऽपि अत्र लोके प्रागवतरणं मन्त्रभागस्य ततः कालान्तरेण ब्राह्मणभागस्येति। सर्वत्र ब्राह्मणग्रन्थेषु तत्तद्वेदमन्त्राणां यज्ञकर्मसु यथायथमुपयोगस्य बहुधा प्रदर्शितत्वात्। मन्त्रभागेष्वपि ऋक्संहितायाः प्रथमम-वतरणं ततो यजुःसंहितादेः। यजुर्वेदे बह्वृनामृङ्मन्त्राणामनुवाददर्श-नात्। ऋङ्मन्त्रानवलम्ब्यैव च सर्वेषां साम्नां गीयमानत्वात्॥ एवं वक्ष्यमाणलक्षणानि कल्पसूत्राणि ब्राह्मणग्रन्थोत्तरकालानि। तेषां ब्राह्मणग्रन्थबोधितयज्ञादिकर्मकाण्डप्रपञ्चभूतत्वादिति बोध्यम्॥

तस्यैतस्य वेदचतुष्टयस्य शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति षडङ्गानि सन्ति। एषां प्रयोजनान्युच्यन्ते—वैदिक-धर्मानुष्ठानेन द्विजानां ब्राह्मणादिजनानां सकलपुरुषार्थसिद्धिरिति हि वैदिकः सिद्धान्तः। वेदवाक्यानां च गूढार्थत्वादक्रमपाठितत्वाच्च न केवलेभ्यस्तेभ्यो यथावत्कर्मस्वरूपमवगन्तुं शक्यते। तस्माद्वेदा-र्थविज्ञानसम्पन्नैः कविभिराचार्यैर्वेदेभ्यो लोकस्य धर्मावबोधार्थ-मिमान्यङ्गानि प्रवर्तितानि॥ तत्र शिक्षा नाम स्वरवर्णाद्युच्चारण-रीत्युपदेशकं शास्त्रम्। सा च शिक्षा 'अथ शिक्षां प्रवक्ष्यामि पाणि-नीयं मतं यथे'ति पाणिनीया शिक्षा सर्ववेदसाधारणा। अन्या अपि प्रतिशाखं भिन्नाः[2] बह्वयः शिक्षाः[3] प्रातिशाख्यपदेन व्यवहृताः

---

१ शतप्रपाठकमित्यर्थः।

२ तासु द्वात्रिंशत् (३२) तु संगृहीताः शिक्षासंग्रहनाम्नि पुस्तके वारा-णस्यां मुद्रिता उपलभ्यन्त एव। (शि० द०)

३ 'प्रातिशाख्यानां शिक्षापदेन व्यवहारे नास्माकं सम्मतिः। किंतु व्या-करणपदेनैव' इति दाधिमथाः।

देवाऽदेवाप्सरोनद्यो गन्धर्वास्ते स्वयम्भुवः ॥ इति ।

एषामुदाहरणानि प्रदर्श्यन्ते । तत्र तृतीयमण्डलद्रष्टा विश्वामित्रः तस्य पुत्रो मधुच्छन्दाः, पौत्रो जेता च मन्त्रद्रष्टाऽभवत्, तस्माद्विश्वामित्र ऋषिः, मधुच्छन्दःप्रभृतयश्च ऋषिपुत्राः । यथा वा आङ्गिरसः पुत्रो रहूगणः, पौत्रो गोतमो, नप्ता वामदेवः, प्रणप्ता बृहदुक्थ्यः त इमे सर्वे मन्त्रद्रष्टारो बभूवुः तस्मादाङ्गिरा ऋषिः । रहूगणादयो हि ऋषिपुत्राः। ऋषिक इत्यत्राल्पार्थे कन्। अल्पऋषिरित्यर्थः । तत्र राजन्य ऋषिको यथा—तृतीयाष्टके 'मम द्विता' (ऋ० ४।४२।१) इति दशर्चस्य सूक्तस्य पुरुकुत्सपुत्रस्त्रसदस्युनामा राजर्षिः । यथा वा तदग्रिमस्य 'क उ श्रवत् (ऋ० ४।४३।१) इति सप्तर्चस्य सूक्तस्य पुरमीढाजमीढौ सुहोत्राभिधस्य राज्ञ पुत्रावृषी । वैश्य ऋषिको यथा अष्टमाष्टकस्य द्वितीयाध्याये 'अग्निरिन्द्रः' (ऋ० १०।६५।१) इति पञ्चर्चस्य सूक्तस्य 'देवान् हुवे'(ऋ०१०।६६।१) इति पञ्चदशर्चस्य सूक्तस्य च वसुक्रपुत्रो वसुकर्ण ऋषिः । स च वैश्य इति सम्प्रदायविद आहुः । युक्तं चैतत्—वसु धनं सुवर्णरजतादि क्रीणातीति वसुक्र इति नामधेयपदस्य तथैव स्वारस्यावगमात्। स्त्रिय ऋषिका यथा चतुर्थाष्टकस्य प्रथमाध्याये 'समिद्धो अग्निः (ऋ० ५।२८।१) इति षळर्चस्य सूक्तस्यात्रिपुत्री विश्ववारानाम्नी ऋषिका । यथा वा अष्टमाष्टके षष्ठाध्याये 'तेऽवदन्' (ऋ० १०।१०९।१) इति सप्तर्चस्य सूक्तस्य ब्रह्मजाया जुहूनाम्नी ऋषिका । स्वयम्भुवो यथा—'इन्द्रस्य दूतीरिषिता चरामि ' (ऋ० १०।१०८।२) इति, ' नाहं तं वेद ' (ऋ० १०।१०८।४) इति चैवमादीनामष्टमाष्टकस्य षष्ठेऽध्याये पठितानां कासांचिद्दचां सरमानाम्नी देवशुनी ऋषिका । सा हि तिर्यग्योनिः । उपनयनाध्ययनाद्यभावेऽपि स्वयं प्रतिभातवेदत्वं स्वयंभूत्वमिति तल्लक्षणं वेदितव्यम्। देवाद्या अप्युपनयनाद्यभाववन्तः स्वयंप्रतिभातवेदा एवेति नैतल्लक्षणमतिवर्त्तन्ते । यथा वा अष्टमाष्टकस्य तृतीयाध्याये 'अग्निः सप्तिं वाजम्' (ऋ० १०।८०।१) इति सप्तर्चस्य सूक्तस्य सौचीकोऽग्निर्देव ऋषिः । एवं यथायथमुदाहार्यम् । स्पष्टश्चायमृषिसूक्तादिलक्षणविचारः शौनकीयसर्वानुक्रमणिकाभाष्ये । चतुर्विधानामप्येषां सामान्यलक्षणं तु ' मन्त्रदृशः ' इत्येव पूर्वाचार्यै-

---

वचनान्तं प्रयुक्तम्। तिर्यग्योनयः पशुजातयः । देवा अदेवा इत्यादयस्ते स्वयम्भुव इति व्यपदिश्यन्ते ।

रुदाहृतम् । दर्शनं ज्ञानम्। तच्च परमेश्वरप्रसादलभ्यं सर्वेषामविशेषात्। किञ्च दर्शनं नाम। सिद्धस्य वस्तुनो विषयीकरणं न तूत्पादनम्। एवं चर्षयो न वेदस्य कर्त्तारः, किन्तु द्रष्टार इति बोध्यम्।

स्यादेतत्—'यस्य वाक्यं स ऋषिः। या तेनोच्यते सा देवता। यदक्षरपरिमाणं तच्छन्दः। अर्थैप्सव ऋषयो देवताश्छन्दोभिरुपाधावन्'[1] (ऋ० सर्वानु० परिभाषा २।४-७) इति सर्वानुक्रमण्यां शौनकोक्तेः, 'अर्थकाम ऋषिर्यस्यां देवतायामार्थपत्यमिच्छन् स्तुतिम् प्रयुङ्क्ते स तद्देवत्यो मन्त्रः'[3] (नि० ७।१) इति नैरुक्ते सप्तमाध्याये यास्कोक्तेश्च मन्त्रकर्त्तार एव ऋषयः किं न स्युः। किञ्च मन्त्रलिङ्गादपि ऋषीणां मन्त्रकर्तृत्वं प्रतीयते। तथाहि। 'सोम[4] गीर्भिष्ट्वा वयं वर्द्धयामो वचोविदः' (ऋ० १।९१।११) इति मन्त्रो 'हे सोम वचोविदो वयं त्वा त्वां गीर्भिर्वर्द्धयामः स्तुमः' इत्यर्थकः, तथा बृहद्देवतोक्तम् 'ऋषिसूक्तानि यावन्ति सूक्तान्येकस्य वै कृतिः' (बृ० दे० १।१४) इति ऋषिसूक्तलक्षणं च वेदवाक्यानि ऋषिकर्तृकाणि इत्यावेदयति इति चेत्। मैवम्। वेदानामपौरुषेयत्वस्य मीमांसाशास्त्रे सिद्धान्ततत्वात्। तथाहि—प्रमाणान्तरेणार्थमुपलभ्य पुरुषनिर्मितत्वं हि पौरुषेयत्वम्। तच्च वेदस्य नास्ति। न च

'तस्माद्यज्ञात्सर्वहुत[5] ऋचः सामानि जज्ञिरे।
छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत' (ऋ० १०।९०।९)

इति ऋङ्मन्त्रेण वेदस्य पौरुषेयत्वमवगम्यत इति वाच्यम्। उक्तमन्त्रेण वेदस्य यज्ञपुरुषादुत्पन्नत्वमात्रबोधनेऽपि प्रमाणान्तरेणार्थमुपलभ्य रचितत्वाबोधनात्। ईश्वरः सर्वज्ञत्वाद्गतकल्पीयं वेदमास्मिन् कल्पे स्मृत्वोपदिशतीत्येतावतैव निर्वाहे पौरुषेयत्वकल्पनानुपपत्तेश्च। 'धाता यथापूर्वमकल्प-

---

१ स्तुतवन्त इत्यर्थः।

२ अर्थस्य अभिलाषविषयस्य पतिः स्वामी प्रदाने प्रभुरिति यावत्। अर्थपतेर्भावः आर्थपत्यम्।

३ मुद्रितपुस्तकेषु त्वेतद्वचनं किञ्चित्पाठभेदेनोपलभ्यते। (मं० दे० भा०)

४ अयं मन्त्रः प्रथमाष्टकस्य षष्ठेऽध्याये पठ्यते।

५ सर्वैर्देवमनुष्यादिभिर्हूयते इज्यते यस्तस्मात्सर्वहुतो यज्ञात् परमेश्वरात् ऋगादयो जज्ञिरे इत्यर्थः।

यत् (ऋ० १० । १६० । ३) इति श्रुतिमूलकेन 'यः कल्पः, स्व पूर्वक' इति न्यायेन संसारस्यानादित्वाच्च । काठकादिसमाम्नायमपि अध्ययनसम्प्रदायप्रवर्त्तकत्वेनोपपत्तेश्चेत्याहुः । युक्तं चैतत् अत एव

'युगान्तेऽन्तर्हितान्वेदान् सेतिहासान् महर्षयः ।
लेभिरे तपसा पूर्वमनुज्ञाताः स्वयम्भुवा ॥

इति स्मर्यते । तथा तैत्तिरीययजुरारण्यके सहवैउपनिषदि 'ब्रह्म ह वै पृश्नीꣳस्तपस्यमानान् ब्रह्म स्वयम्भ्वभ्यानर्ष त ऋषयोऽभवंस्तदृषीणामृषित्वम्'(cp.तै०आ०२।९)इति श्रूयते। स्वयम्भु प्रमाणान्तरमजीव्य स्वयम्भूतं स्वतःप्रमाणभूतमिति यावत्। ब्रह्म वेदः तपश्चरतः जान् अयोनिसम्भवान् पृश्नीन् पुरुषान् प्रति अभ्यानर्ष अभिज्ञा ऋषी गतौ तुदादिः । परोक्षे लिट् । अतस्ते ऋषयोऽभवन्नि दिस्तदर्थः ॥ नैरुक्तग्रन्थे द्वितीयाध्याये 'ऋषिर्दर्शनात्स्तोमान् त्यौपमन्यवः' (नि० २ । ११) इति वदन् यास्कमुनिरपि ऋषि प्रवृत्तिनिमित्तं वेदसम्बन्धि दर्शनमेव निर्णीतवान् । एवं च ऋषि वेदं पश्यतीत्यृषिः । धातूनामनेकार्थकत्वादत्र ऋषेर्धातोर्दर्शने स्व गत्यर्थकानां ज्ञानार्थकत्वाद्वा । प्रकृते हि दर्शनं प्रत्यक्षीकरणमे तु चाक्षुषं ज्ञानमिति भावः । किञ्च

[1]अहे बुध्निय मन्त्रं मे गोपाय । यमृषयस्त्रैविदा विदुः ।
ऋचः सामानि यजूꣳषि । सा हि श्रीरमृता सताम् ॥ (तै० १ । २ । १ । २६) ।

इति कृष्णयजुर्मन्त्रेण ऋषयो विदुरित्युक्त्वात्तेषां वेदकर्तृ भावो बोधितः । अन्यथा चक्रुरित्येव तत्र श्रुतं स्यात् । यत्तु 'गीर्भिष्ट्वा वय'मिति मन्त्रलिङ्गं कर्तृत्वसाधकतयोपन्यस्तम् । तत् तथा साधयति,'वचोविद' इति विशेषणेन पूर्वासिद्धानामेव वेदव वेत्तारो वयमित्यर्थस्य क्रोडीकारात् (?करणात्), 'गीर्भि'रित्यस्य वाणीभिरित्यर्थाच्च ॥ नन्वेवमपि वयमित्यस्मच्छब्दप्रयोगाद् 'वर्द्ध इत्युत्तमपुरुषप्रयोगाच्चैवंविधमन्त्राणामृषिकर्तृकत्वं दुर्निवारम् ॥ प्रणीतेष्वेव वाक्येषु वयं स्तुमो वयमवोचाम इत्यादिप्रयोगद

---

१ त्रैविदा ऋषयः ऋचः सामानि यजूंषीत्येवं रूपं यं विदुर्ज्ञातवन्तः स मन्त्रं वेदत्रयलक्षणं हे अहे बुध्निय त्वं गोपाय रक्षस्व । सा वेदत्रयी हि हेतोः सताममृता अक्षया श्रीः सम्पत्तिरित्यर्थः ।

दिति चेत्। सत्यम्। परन्तु नैव दोषो वेदे सम्प्रसरति निजतपोमहिम्ना प्राप्तपरमेश्वरतादात्म्यानामृषीणां मुखतः प्रादुर्भूततथाविधवाक्यानामपि परमेश्वरप्रणीतत्वाद्ब्राह्मणात्। तथा चोक्तं शतपथब्राह्मणे चतुर्दशप्रपाठकस्य चतुर्थाध्याये "ब्रह्म वा इदमग्र आसीत्। तदात्मानमेवावेदहं ब्रह्मास्मीति। तस्मात्तत्सर्वमभवत्। तद्यो देवानां प्रत्यबुध्यत स एव तदभवत्। तथर्षीणां तथा मनुष्याणाम्। तद्धैतत् पश्यन् ऋषिर्वामदेवः प्रतिपेदे अहं मनुरभवं सूर्यश्चाहं कक्षीवाँ ऋषिरस्मि विप्रश्चे'त्यादि। 'अहं मनुरभवम्' (ऋ० ४।२६।१) इति सूक्तमृग्वेदे तृतीयाष्टकस्य षष्ठेऽध्याये पठ्यते। अनेन सूक्तेन वामदेव ऋषिर्विश्वरूपब्रह्मभावं साक्षात्कृतवतः स्वस्यानुभवमनुवदति॥ एवमेतरयेकऽपि श्रूयते(?)—'य एते खल्वमी मन्त्रदृशः सर्व एते परस्यैव विभूति'रिति॥ 'यस्य वाक्यं स ऋषिः' इति सर्वानुक्रमणीसूत्रस्य तु 'यस्य दृष्टं वाक्य'मित्यर्थ इति न कोऽपि विरोधः॥ एवं च 'गृत्समदो द्वितीयमगच्छत्तमपश्यत्' (ऋ० सर्वानु० २।१) इति सर्वानुक्रमगतं सूत्रमपि सङ्गच्छते। अन्यथा स्वग्रन्थेनैव विरुध्येत। किंच बृहद्देवतायाम् ऋषिसूक्तलक्षणे—ऋषिसूक्तानि यावन्ति सूक्तान्येकस्य वै कृति'रित्यत्र कृतिरित्यस्य दर्शनक्रियेत्यर्थः सकलश्रुतिस्मृत्यनुरोधादवगन्तव्यः॥

अथ वेदस्य श्रुतिरिति संज्ञायां श्रुत एवायं सर्वैर्न त्वस्य कश्चिच्छरीरी कर्त्तोपलभ्यत इति तात्पर्यमवधार्यति॥ एवं च पारम्पर्यक्रमागतमेव वेदज्ञानं सर्वेषाम्, न तु ऋग्योऽपि तस्य स्वतन्त्राः कर्त्तार इति लभ्यते। अत एव ऋग्वेद तृतीयाष्टकस्य चतुर्थाध्याये पठ्यते—'मँहो रजामि बन्धुता वचोभिस्तन्मा पितुर्गोतमाद्

---

१ अग्रे सृष्टेः पूर्वम् इदं सम्प्रति दृश्यमानं विश्वम् ब्रह्म वा आसीत्। वाशब्द एवार्थे। तद्ब्रह्म आत्मानमेवाहं ब्रह्मास्मीत्येवं साक्षादकरोत्। तस्मात् ततश्च तद्ब्रह्म सर्वं विश्वरूपमभवत्। तद् तस्मात् कारणात् देवानामृषीणां मनुष्याणां वामदेवः पुमान् प्रत्यबुध्यत प्रत्यगात्मनो ब्रह्मभावं साक्षादकरोत् स एव पुमान् तत् विश्वरूपं ब्रह्माभवत्। अत्रार्थे वामदेवस्य महर्षेरनुभवं ऋग्वेदप्रसिद्धं संवादयति—अहं मनुरित्यादिना॥

२ हे अग्ने यदहं महः कमनीयं यथा स्यात्तथा बन्धुता स्वदीयत्वेन बन्धनशीलत्वम्। द्वितीयार्थे व्यत्ययेन प्रथमा। वचोभिः कृत्वा रजामि सम्पादयामि। तदेतत् मा मां प्रति गोतमात् पितुर्मज्जनकात् सकाशात् अन्वियाय अनुगतम् प्राप्तमित्यर्थः।

दन्वियाय' (ऋ० ४ । ४ । ११) इति ॥ तथा ऐतरेयब्राह्मणे पठ्यते-'प्रजापतिरकामयत प्रजायेय भूयान्स्यामिति स तपोऽतप्यत स तपस्तप्त्वेमान् लोकानसृजत पृथिवीमन्तरिक्षं दिवम्। तान् लोकानभ्यतपत्[1] तेभ्योऽभितप्तेभ्यस्त्रीणि ज्योतींष्यजायन्ताग्निरेव पृथिव्या अजायत वायुरन्तरिक्षादादित्यो दिवस्तानि ज्योतींष्यभ्यतपत् तेभ्योऽभितप्तेभ्यस्त्रयो वेदा अजायन्त ऋग्वेद एवाग्नेरजायत यजुर्वेदो वायोः सामवेद आदित्यात्। तान् वेदानभ्यतपत् तेभ्योऽभितप्तेभ्यस्त्रीणि शुक्राण्यजायन्त भूरित्येव ऋग्वेदादजायत भुव इति यजुर्वेदात् स्वरिति सामवेदात्, तानि शुक्राण्यभ्यतपत् तेभ्योऽभितप्तेभ्यस्त्रयो वर्णा अजायन्ताकार उकारो मकार इति, तानेकधा समभरत्तदेतदोमिति' (ऐ० ब्रा० ५ । ३२) इति। एतद्ब्राह्मणपर्यालोचनया प्रजापतिरेवाग्रे स्वतपःप्रभावेन सप्रणवव्याहृतिकां त्रयीमपश्यत् ततः परं यथायथं निजतपोबलेन तैस्तैर्ऋषिभिस्ते ते मन्त्रादिभागाः परमेश्वरप्रसादतो लब्ध्वा यथास्थितस्वरवर्णानुरूपं पठित्वा लोकेऽत्र प्रकटीकृता इति प्रतीयते इत्याहुः ॥

ननु यदि सिद्धानामेव मन्त्राणां दर्शनं मधुच्छन्दःप्रभृतीनामृषित्वसम्पादकम्, तर्हीदानींतनेषु श्रोत्रियेष्वपि ऋषित्वमतिप्रसज्येतेति चेत्। मैवम्। इह लोके स्वेतरैरदृष्टपूर्वाणामेव श्रुतिवाक्यानां गुरुदेवताप्रसादेन संजातदर्शनस्यैव स्वस्मिन्नृषित्वसम्पादकत्वादित्यलमनया प्रसङ्गानुप्रसङ्ग्या ॥

प्रकृतमनुसरामः—

'एकशतमध्वर्युशाखाः' (महाभा० पस्पशाह्नि०) इति महाभाष्ये पतञ्जलिराह। 'यजुर्वेदस्य षडशीतिभेदा भवन्ति' (च० २) इति चरणव्यूहः। परन्त्वेषु शाखाभेदेषु कतिचिदुच्छिन्नाः सन्तो नामतोऽपि न ज्ञायन्ते। येषां हि नामानि ग्रन्थेषूपलभ्यन्ते तान् भेदान् वदामः—चरकाः, आह्वरकाः, कठाः, प्राच्यकठाः, कापिष्ठलकठाः, चारायणीयाः, वारतन्तवीयाः, श्वेताः, श्वेततराः, औपमन्यवाः पाताण्डेनेयाः, मैत्रायणीयाश्चेति। मैत्रायणीयानामपि षड्भेदा भवन्ति—मानवा वाराह्या दुन्दुभाश्छागलेया हारिद्रवीयाः श्यामायनीयाश्चेति। तथा चरकविशेषाणां तैत्तिरीयकाणां द्वौ भेदौ

---

१ अभ्यतपत् स्वतपःप्रभावसंस्कृतान् अकरोदित्यर्थः। एवमग्रेऽपि बोध्यम्। प्रजापतितपःप्रभावेन तेभ्यस्तेभ्यस्तानि तानि वस्तून्यजायन्तेति भावः।

भवतः—औखीयाः खाण्डिकीयाश्चेति । खाण्डिकीया अपि पञ्चधा भिन्नाः—आपस्तम्बी बौधायनी सत्याषाढी हिरण्यकेशी शाट्यायनी चेति[1]। वारतन्तवीया औखीयाः खाण्डिकीयास्तैत्तिरीया इत्यत्र 'तित्तिरिवरतन्तुखण्डिकोखाच्छण्' (अष्टा० ४। ३।१०२) इति पाणिनीयसूत्रेण छणप्रत्ययः, आपस्तम्बीत्यादिपञ्चसु 'कलापिवैशम्पायनान्तेवासिभ्यश्च' (अष्टा० ४ । ३ । १०४) इति सूत्रेण णिनिः। एषां सर्वेषां स्वाध्यायमानं चरणव्यूहे प्रोक्तम्—

'अष्टादश सहस्राणि मन्त्रब्राह्मणयोः सह ।
यजूंषि यत्र पठ्यन्ते स यजुर्वेद उच्यते ॥ (cp. च० २) इति ।

सर्व एवैते भेदाः कृष्णयजुःशब्देन व्यवह्रियन्ते । वक्ष्यमाणाः काण्वमाध्यन्दिनादयस्तु शुक्लयजुःशब्देन । तत्कारणं सम्प्रदायविद एवमाहुः—वैशम्पायनो नाम यजुर्वेदाचार्यो येनाध्यापिता बहवः शिष्या वेदवेदाङ्गपारगाः संवृत्ताः । स कदाचित्केनाचिन्निमित्तेन ब्रह्महत्यापातकवान् संवृत्तः। ततो द्वादशवार्षिकं ब्रह्महत्यापापापहं व्रतं चरितुकाममाचार्यं प्रति शिष्याः प्रोचुः—'भगवन् द्वादशवार्षिकस्यैतद्व्रतस्य षष्ट्युत्तराणि त्रीणि शतानि प्राजापत्यानि भवन्ति तानि सर्वे वयं भवत्पापक्षयार्थं चराम' इति । अनुमतं च तत्तथास्त्वित्याचार्येण । यदाह व्यासः—

वैशम्पायनशिष्यास्ते चरकाध्वर्यवोऽभवन् ।
यच्चेरुर्ब्रह्महत्यांहःक्षपणं स्वगुरोर्व्रतम् ॥ इति ॥

एवं व्रतं चरत्सु तेषु याज्ञवल्क्यनामा शिष्यो गुरुमभ्येत्य प्रोवाच, भो भगवन् किमेतेषां क्षुद्राणां व्रतचर्यया भविष्यति, नून-मद्भैवैकः सुदुश्चरमपि भवद्व्रतं चरिष्ये' इति ॥ तच्छ्रुत्वा कुपितो गुरुरुवाच—'अलं त्वया ब्राह्मणावमानिनाऽभिमानिना, यदधीतं मत्तस्तदाशु त्यजे'ति । सोपि 'किमहं निगीर्णमन्त्रमिवाधीतं वमामी'त्युपहासवादं वदन् गुरुणा 'तथैवास्त्व'ति प्रत्युक्तो यावच्छर्दितवांस्तावद्ददाज्ज्वलं वेदज्योतिर्मूर्त्तं खादिराङ्गारकल्पं पुरस्ताद् भुवि विप्रकीर्णमपश्यत्, स्वयं च न किञ्चिदधीतं सस्मार । ततो याज्ञवल्क्येन प्रच्छर्दितं वेदराशिं गुर्वनुज्ञया शिष्या जगृहुः । परं छर्दितस्यादमं विप्ररूपेणानुचितमपि मनसि निधाय तित्तिरयो भूत्वा गृहीतवन्तस्ते तदाप्रभृति तैत्तिरीया अभूवन् । अथ याज्ञवल्क्यो

---

१ अत्र चरणव्यूहस्य द्वितीया कण्डिका द्रष्टव्या । (मं० दे० शा०)